(२) इयं च स्वस्त्रीभिः सह अनेकप्रकारेण प्रवर्तते। तथाहि परस्परशरीरोपरि जलसिञ्चनं पतामीति कृत्रिमभीत्या पतिकण्ठदेशावलम्बनं काष्ठमयतरिभिरितस्ततस्तरणं पुनस्ततो जलमध्ये पतनमित्याद्यनेकप्रकारेणैषा क्रीडा प्रवर्तते। अस्यां परस्परवस्त्राकर्षणमपि प्रवर्तते[१]।

१७ कन्दुकक्रीडा—(१) यत्र कन्दुकं निर्माय सङ्घस्थः कश्चिद् व्योम्नि प्रक्षिपति यद्यन्यो मध्ये कश्चित्तं कन्दुकं भूमिस्पर्शात्प्रागेव स्वीकरोति तदा स येन पूर्वं प्रक्षिप्तः तस्याश्वस्य इव पृष्ठमारुह्य कन्दुकं पुनश्च भूमौ प्रक्षिपति, यदि तं कन्दुकमन्यो धारयति तदा तेन पूर्वप्रक्षेपकपृष्ठारोहणपूर्वकं पुनः पूर्ववत्कन्दुको भूमौ प्रक्षेपणीयः, भूमिस्थं तं कन्दुकमादाय पलायतां बालानां मध्ये यस्य कस्यापि पृष्ठदेशे स कन्दुकस्ताडनीयः, यस्य लग्नस्तेन कन्दुको व्योममार्गस्थः कार्यः, यदि

चूतं तत्तीरगं दृष्ट्वा विशालं फलसंयुतम्।
आरुरोह मयूरेशो........................ ॥
ततस्ते जलमाविश्यासिञ्चन्नञ्जलीर्मिथः।
ऐकमत्येन।ते सर्वे प्रासिञ्चन् गणनायकम् ॥" (गणे० पु० उ० १००, २०)

(१) "सिषिचुः केशवं पत्न्यो धीरा इव महोदधिम्।
सिषेच ताश्च गोविन्दो मेघः फुल्ललता इव ॥
अवलम्ब्य पराः कण्ठे हरिं हरिणलोचनाः।
उपगूहस्व मां वीर पतामीत्यब्रुवन् स्त्रियः ॥
कश्चित्काष्ठमयैस्तेरुः..................... ॥ (हरि० वि० ८८, २६-२७)
जलं ददौ राधिकाय सकामो माधवः स्वयम्।
ददौ सा च माधवाय कामार्तायाञ्जलित्रयम् ॥
वस्त्रं जग्राह तस्याथ......................... ॥"

(ब्रह्मवैवर्तखं० ४ अ० २८, १३३-१४२)

इयं च भारतादिग्रन्थे, किरातार्जुनीयनवमसर्गे शिशुपालवधाष्टमसर्गे च प्रसिद्धतरा सा तत एव ज्ञेया।

CC.O Sampurnanand University Collection. Digitized by eGangotri

कश्चित्तं न मध्ये स्वीकरोति तदा पूर्वेणैव पुनर्व्योमगः कार्यः येन धृतः स प्रक्षेप्तारमारुह्य पूर्ववत्क्षिपेत्[1]।

(२) इयं च क्रीडा कन्यकया बालकेन वैकेनानेकैरपि संपाद्यते। कन्दुको हस्तेन पुनः पुनरेकत्र स्थल एव ताड्यते, अन्यत्र च प्रक्षिप्यते, सर्वत्र दिक्षु प्रचाल्यते च। मध्ये च व्योमार्गस्थोऽपि क्रियते, तत आगतश्च पुनस्तथैव ताड्यते, खेलने चानेकवारं निषद्योत्थाय निमील्योन्मील्य स्थित्वा गत्वा चैवातिविचित्रं परिक्रीड्यते[2]।

१८ वनभोजनक्रीडा—यत्राह्लादकमरण्यभागं दृष्ट्वा तत्र स्वगृहान्नीतान्यन्नयुक्तानि शिक्यानि मध्ये संस्थाप्य मण्डलाकारमुपविश्यानन्तरं पल्लवेषु, अङ्कुरेषु, पर्णेषु, शिक्येषु, दृषत्सु च स्वीयान्नादिकं निधाय स्वभोज्यादिकं परस्पराय परिवेष्य परस्परं हसन्तो

---

(१) "ततस्ते कन्दुकं कृत्वा तेन क्रीडामथारभन्।
कन्दुको व्योममार्गस्थो बालत्यक्तोऽस्पृशत्करम्।
कृत्वाश्ववत्तं बालमारुरोह सकन्दुकः॥
आरोहको बलाद्भूमौ निक्षिपेत्तं च कन्दुकम्।
धारयेदपरस्तं वा आगतं सोऽपि वा पुनः॥
यद्धस्ते कन्दुकः सोऽथ बालमारुह्य तं त्यजेत्।
भूमौ निपतितं बाल आदाय तेन ताडयेत्॥
तेषु मध्ये पलायत्सु यस्य लग्नः स कन्दुकः।
तेनापि व्योममार्गस्थः कार्यो यस्य करं स्पृशेत्॥
हस्ते नायाति चेत्सोऽपि व्योमगं तं तु कारयेत्।
येन हस्ते धृतः सोऽमुमारुह्य पूर्ववत्क्षिपेत्॥" (गणे० पु० उ० ९४, ४०-४५)

(२) अस्याः क्रीडाया विस्तृतं सुचारु च वर्णनं दशकुमारस्य षष्ठ उच्छ्वासे कन्दुकावत्याः कन्दुकक्रीडनवर्णनप्रसङ्ग उपलभ्यते तत्तोऽवधार्यम्। तथा स्वप्नवासवदत्ते नाटके द्वितियाङ्केऽप्यल्पं कन्दुकक्रीडावर्णनमुपलभ्यते। तथा सुभाषितरत्नभाण्डागारे कन्दुकक्रीडावर्णनप्रसङ्गोऽवश्यं द्रष्टव्यः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

हासयन्तश्च भोजनं कुर्वन्ति। क्वचित्स्वकवलं मधुरमन्यस्य मुखे प्रवेशयन्ति च[1]।

१९ रासक्रीडा—यत्र नद्याः पुलिने कन्यकाः पुत्रकाश्चान्तरान्तरा बालकमन्तरामन्तरा कन्यकां च कृत्वा परस्परकरस्वीकरणपूर्वकं नृत्यन्तो गायन्तश्च तालिकानादपुरःसरं मण्डलाकारेणोपविश्योपविश्य, उत्थायोत्थाय च गायन्तः क्रीडन्ति। वाद्यादिना, हस्तमितकाष्ठदण्डद्वयेन वाद्यातपुरःसरं मण्डलाकारं नृत्यन्तो गायन्ति[2]।

२० छालिक्यक्रीडा—गीतविशेषमिदं गन्धर्वेषु प्रसिद्धतमम्, अनेकस्त्रीसहितं दुग्धमद्यपानानन्तरं तद्गीयतेस्म, एतच्च क्रीडाविशेषप्रकारेण हरिवंशे पठ्यते[3]।

---

(१) "अहोतिरम्यं पुलिनं वयस्याः.............।
अत्र भोक्तव्यमस्माभिः..................॥
दिवारूढं क्षुधार्दिताः।
मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा॥
कृष्णस्य विष्वक् पुरुराजिमण्डलैरभ्याननाः फुल्लदृशो व्रजार्भकाः।
सहोपविष्टाः...। केचित्पुष्पैर्दलैः केचित्पल्लवैरङ्कुरैः फलैः॥
शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः।
सर्वे मिथो दर्शयन्तः स्वस्वभोज्यरुचिं पृथक्।
हसन्तो हासयन्तश्च अभ्यवजह्रुः सहेश्वराः॥" (भाग० १०, १३, ९-१०)
तथा (१०, २०, २८-२९)

(२) "नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम्।
रेमे तत्तरलानन्दकुमुदामोदवायुना" ॥ इ० (भाग० १०, २९, ४९)

(३) "तृप्ताः प्रवृत्ताः पुनरेव वीरास्ते भैममुख्या वनितासहायाः।...
आज्ञापयामास ततः स तस्यां निशि प्रहृष्टो भगवानुपेन्द्रः।
छालिक्यगेयं बहुसन्निधानं यदेव गान्धर्वमुदाहरन्ति" ॥
भानुमतीहरणे छालिक्यक्रीडावर्णनं नाम इत्यादिकम्।
(हरि० विष्णुप० ८९, ६६-६७)

CC.O Sampurnanand University Collection. Digitized by eGangotri

२१ नियुद्धक्रीडा—परस्परं वीरौ जयपराजयेच्छयानेकप्रकारकं बाहुयुद्धं कुरुतः, तन्नियुद्धं बाहुयुद्धमित्यादिशब्देन लोकप्रसिद्धम्[1]। अत्र खेलनमेव प्रधानतयास्ति परन्तु क्वचिदुभयोर्मध्ये कस्यचिन्नाशं यावदप्येतन्नियुद्धं प्रचलतिस्म[2]। अत्रानेकप्रकारिकाः खेलनपद्धतयः सन्ति। ताश्च आकर्षण-विकर्षणेत्याद्यनेकप्रकारकप्रसिद्धाः[3]। अनया रीत्या प्रयुद्ध्यैव भीमेन जरासन्ध-हिडिम्बासुर-बकासुर-कीचकप्रभृतयो विनाशिताः।

२२ नृत्यक्रीडा—(१) बालका बालिका वा कंचित्प्रकारं निश्चित्य नृत्यन्ति। प्रायः यदा कश्चिन्नृत्यति तदान्यो करतालिकाभिरन्यैश्चोपायैस्तदनुकूलं शब्दं करोति। अन्यश्च गायति, तथापरे साधुसाध्वितिरीत्या प्रशंसन्ति[4]।

---

(१) "चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित्"। (भाग० १०,१७,१२)

(२) भीमजरासन्धादिनियुद्धं श्रीभारते द्वितीयपर्वणि २३ अध्यायादिप्रसिद्धं तत्त एवावलोकनीयम्।

(३) नियुद्धीयपद्धतिप्रकारश्च—

"नियुद्धस्याथ कर्मंच।
आकर्षणं विकर्षञ्च बाहूनामूलमेव च।
ग्रीवाविपरिवर्तञ्च पृष्ठभङ्गं सुदारुणम्।
पर्यासनविपर्यासौ पशुमारमजाविकम्॥
पादप्रहारमास्फोटं कटिरेचितकं तथा।
गात्राश्लेषं स्कन्धगतं महीव्याजनमेव च॥"

इत्याद्यनेके प्रकाराः प्रसिद्धाः। (अग्निपु० अ० २६२, श्लोक २४-३०)

(४) "रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः।
कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन्॥
वेणुपाणितलैः शृङ्गैः प्रशशंसुरथापरे।
गोपजातिप्रतिच्छन्नदेहा गोपालरूपिणः॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

(२) अनेकगानप्रसिद्धरागान् गीतवन्तः हावभावसमन्विताश्च नृत्यन्ति[1]। इयञ्च क्रीडा बालिकाभिः संमिलितैर्बालकैर्भवति। पूर्वा तु केवलबालकैः बालिकाभिश्च वा भवत्ययमेवोभयत्र भेदः।

२३ अक्षक्रीडा—इयं च शारिकाभिरनेकपाशैश्च संपद्यते। इयं चातीवप्राचीना, दुष्टपरिणामा चात एव ऋग्वेदादिषु अस्या निषेध उपलभ्यते[2]। प्रायोऽनेकग्रन्थेषूपलभ्यत एषा।

२४ मृगयाक्रीडा—(१) प्रायः सर्वदा अस्याः क्रीडायाः प्रचार आसीत्। अस्यास्तु वर्णनं यजुर्वेदादिष्वप्युपलभ्यते[3]। पाणिनि-

---

ईडिरे कृष्णरामौ च नटा इव नटान् नृप" (भाग० १०, १८, ९-११)

(१) श्रीरागं चापि हिन्दोलं रागमेवं पृथक् पृथक्।
अष्टतालस्त्रिभिर्ग्रामैः स्वरैः सप्तभिरग्रतः॥
नृत्यैर्नानाविधैरम्यैर्हावभावसमन्वितैः।
तोषयन्त्यो हरिं राधां कटाक्षैर्व्रजगोपिकाः॥
(गर्गसं० खं० २ अ० २१ श्लो० ३७-३८)

(२) निरुक्ते दैवतकाण्डे (अ० ७ खं० ३) 'भोजस्येदं पुष्करिणीव वेश्म इत्येवमक्षसूक्ते द्यूतनिन्दा च कृषिप्रशंसा च' इतिनिरुक्तप्रतीकव्याख्यानप्रसङ्गतो दुर्गाचार्यकृतटीकायां 'अक्षैर्मा दीव्यः कृषमित्कृषस्व वित्ते रमस्व बहुमन्यमानः'। इति (ऋ० वे० ७, ८, ९, ३) ऋङ्मन्त्रव्याख्यानं द्रष्टव्यम्।

"अनक्षज्ञो ह्ययं राजन्नपि तद्व्यसनं महत्। इत्युक्तो बलमाहूय तेनाक्षै रुक्म्यदीव्यत" (भाग० १०, ६७, २८-४०) इत्यादिषु खेलनप्रकारः परिणामश्च द्रष्टव्यः। भारते सभापर्वणि विराटपर्वणि नलचरित्रे च तथैवावलोक्यते। 'सप्तमीशौण्डैः' (पा० सू० २, १, ४०) 'निर्वृत्तेऽक्षद्यूतादिभ्यः' (पा० सू० ४, ४, २०) 'तेन दिव्यति' (पा० ४, ४, ३) इत्यादिपाणिनीयसूत्रीयभाष्येऽपि लभ्यते खेलनविचारः।

(३) "मृगयुभ्यश्च वो नमः।" (वा० सं० १६, १७) "मृगः स मृगयुस्त्वम्" (अ० वे० १०,१,२६)

CC.O Sampurnanand University Collection. Digitized by eGangotri

सूत्रतोऽपि क्रीडाप्रकारविशेषो लभ्यते[1]। रामायणादितः क्षत्रियादिषु प्रचारोऽस्या उपलभ्यते[2]। मृगयापद्धतिस्तु-उपानद्गूढपादो गोधाङ्गुलित्राणयुतो धनुरादिसहितः वने गत्वा कुत्रचिल्लीनस्तिष्ठेत् तत्र स्वभृत्यैर्महता कोलाहलेन 'अयं मृगो याति पलायते हन्तव्य एष' इति मृगादिपशून् प्रदर्श्य क्वचिद्धावमानः क्वचिदुत्पतन् मृगादिकान् हन्ति[3] मृगयुः। असहायेनापि प्रवर्तते क्रीडैषा[4]।

पक्षिहननम्—(२) अत्र पक्ष्यादिवधप्रकारोऽपि मृगयाशब्देन स्वीकर्तव्यः, मृगपदस्यानया रीत्या हन्तव्यप्राणिबोधकत्वात्। ग्रन्थेषु स प्रकारोऽप्युपलभ्यते[5]।

---

(१) 'सपत्रनिष्पत्रादतिव्यथने' (पा० सू० ५, ४, ६२) 'पक्षिमत्स्यमृगान् हन्ति' (पा० ४, ४, ३६)

(२) "यदा हि हयमारूढो मृगयां याति राघवः।
अथैनं पृष्ठतोऽभ्येति सधनुः परिपालयन्॥" (वा० रामा० १८, २७, ३१)

तथाध्यात्मरामायणेऽपि—"अश्वारूढो वनं याति मृगयायै सलक्ष्मणः। हत्वा दुष्टान्मृगान्सर्वान्पित्रे सर्वं न्यवेदयत्॥" (अ० रामा० १, ३, ६३)

(३) "दिलीपो भूभुजां श्रेष्ठो मृगयारसिको भृशम्।……॥ उपानद्गूढपादस्तु ……॥ बद्धगोधाङ्गुलित्राणो धनुःपाणिः सरीसृपः॥ …॥ हन्यतां हन्यतामेषो मृगो वैषः पलायते। इतिजल्पन् स्वभृत्येषु स्वयमुत्पत्य हन्ति च॥ इतस्ततः पुनर्याति…। क्वचित्कोटरसंलीनः……। कुर्वन् कोलाहलं तत्र · …"॥

(पद्मपुराणीयोत्तरखण्डस्थमाघमाहा० अ० १, १, १८)

(४) "मार्गं देहि पदं निधेहि निभृतं तं शब्दमाकर्णय। श्वानं वारय कन्दलात्कलकलः कोऽयं सखे तावकः। इत्यन्योन्यमनेकधामृगवधव्यापारपारंगमैर्व्याधैः कोऽप्यधिको रसः प्रतिपदं जल्पद्भिरुत्पाद्यते" ॥ (इति पुष्पाकरकवेः पद्यम्) तथा सुभाषितरत्नभाण्डागारस्थं सर्वमपि मृगयाप्रकरणं तथा बाणरचितकादम्बरीग्रन्थस्थशुकप्रोक्तं सर्वमपि मृगयावर्णनमालोचनीयम्।

(५) स च कादम्बरीग्रन्थे शुकशावकग्रहणप्रसङ्गे विशेषत उपलभ्यते स तत्रैवावलोकनीयः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

मत्स्यवधः—(३) तथात्र मत्स्यवधप्रकारोऽप्यनुसन्धेयः। तस्याप्यनेकविधत्वमुपलभ्यते। सोऽपि क्रीडान्तर्गत एव[१]।

२५ चतुरङ्गक्रीडा—अयं शब्दप्रयोगो धर्मशास्त्रीयषोडशसंस्कारनिरूपणप्रसङ्गे विष्णुबलिसंस्कारे दृश्यते। "चतुरङ्गक्रीडावन्मण्डलं विधाय" इति तथान्यत्रापि[२]। 'शतरञ्ज' पदेन लोके प्रसिद्धा।

२६ कृत्रिमपुत्रकक्रीडा—इयं च लोके 'गुडियों का खेल'पदेन प्रसिद्धा। प्रकारोऽपि प्रसिद्ध एव[३]।

२७ वल्लीवृक्षविवाहः—अत्र नूतनवल्लीं नूतनवृक्षं च बाल्यत एव वर्धयित्वा पुनश्च युनोस्तयोर्महतोत्सवेन विवाहः क्रियते स्म। ऋष्याश्रमेषु प्रायोऽयं प्रकारः प्रचलतिस्म[४]।

२८ वीटाक्रीडा—यत्रार्धवितस्तिमात्रां वीटां हस्तमितेन दण्डेन प्रताड्य तां व्योमगां कृत्वा भूमौ पतनात्प्रागेव पुनर्दण्डेन प्रताड्य

(१) अत्र पञ्चतन्त्रीयचतुर्थतन्त्रस्था 'शतबुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः। एकबुद्धिरहं भद्रे क्रीडामि विमले जले,॥ इतिकथास्थपद्धतिप्रकारोऽनुसन्धेयः।

(२) नारायणभट्टभट्टकृतप्रयोगरत्ने विष्णुबलिप्रकरणम्। शूलपाणिकृता चतुरङ्गदीपिका च द्रष्टव्या।

(३) 'मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च' (कुमा० सं० १,२९)

(४) अत्र शाकुन्तलप्रथमाङ्कस्थप्रसङ्गोऽनुसन्धेयः—अनुसूया–हला शकुन्तले, इयं स्वयंवरवधूः सहकारस्य, त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका, एनां विस्मृतवत्यसि।

शकुन्तला—तदात्मानमपि विस्मरिष्यामि। हला रमणीये खलु काल एतस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः। नवकुसुमयौवना वनज्योत्स्ना, स्निग्धपल्लवतयोपभोगक्षमः सहकारः। तथा चतुर्थाङ्के—

शकुन्तला—तात लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये।

काश्यपः—अवैमि ते तस्यां सोदर्यस्नेहम्।

तथा तत्रैव काश्यपः–आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः ॥८॥ इति।

CC.O Sampurnanand University Collection. Digitized by eGangotri

यावद्दूरं प्रक्षिप्य वीटापतनस्थानाद्गणयित्वान्ततो गणनाधिक्यन्यूनत्वसङ्ख्यया जयपराजयोऽवधार्यते सा वीटाक्रीडा[1]।

२९ कनकशृङ्गकोशक्रीडा—अनेकसुगन्धिद्रव्यमिश्रितं जलमनेकवर्णमिश्रितं च कृत्वा कनकशृङ्गकोशैः स्त्रीपुरुषैः परस्परं बालकैर्वा परस्परं प्रक्षिप्यते सा क्रीडा यथोक्तनामप्रसिद्धा[2]।

३० वैवाहिकक्रीडा—विवाहार्थमागतानां वरसम्बन्धिस्त्रीपुरुषाणां विवाहानन्तरं वधूगृहस्थितैः स्त्रीपुरुषैश्चानेकप्रकारेण वञ्चनादिकं हास्योत्पादकमनुष्ठीयते सा क्रीडा विवाहसम्बन्धात्कृत्रिमवैवाहिकक्रीडानामिका[3]।

३१ हल्लीषक्रीडा—(हल्लीसकेतिपाठः) रासक्रीडाविशेष एव। रासक्रीडायां कन्यकामन्तरा बालकस्तमन्तरा च कन्यका। अत्र च मध्य एक एव बालकस्तिष्ठति, तमभितो मण्डलाकारं विधाय गायन्त्यो नृत्यन्त्यो बालिकाः परिभ्रमन्ति। एषा क्रीडा यथोक्तशब्देनोच्यते[4]।

---

(१) लोकप्रसिद्धैषा। "क्रीडन्तो वीटया तत्र वीराः पर्यचरन्मुदा।"
(भारते—आदि० १३१, १७)

(२) लोकप्रसिद्धैषा। तारापीडक्रीडावर्णनप्रसङ्गे बाणरचितकादम्बरीग्रन्थे प्रसिद्धा। "कामिनीकरपुटविनिर्गताभिः कुङ्कुमजलधाराभिः पिञ्जरीक्रियमाणकायो कक्षाजलच्छटाप्रहारपाटलीकृतदुकूलो मृगमदजलबिन्दुशबलचन्दनस्थासकः कनकशृङ्गकोशश्रियं चिक्रीड।" इति।

(३) इयं च लोकेऽनेकप्रकारेण प्रसिद्धा देशाचारभिन्ना च। नैषधीयचरिते षोडशसर्गे ४९ श्लोकादारभ्य विशेषत उपलभ्यते। सा ततोऽवगन्तव्या।

(४) "तास्तु पङ्क्तीकृताः सर्वा रमयन्ति मनोरमम्।
गायन्त्यः कृष्णचरितं द्वन्द्वशो गोपकन्यकाः॥
कृष्णलीलानुकारिण्यः कृष्णप्रणिहितेक्षणाः॥" (हरिवं० वि० २०, २५-२६)

CC.O Sampurnanand University Collection. Digitized by eGangotri

३२ सगायनकूर्दनक्रीडा—एषा च क्रीडा जलक्रीडाङ्गभूता उपलभ्यते। जलक्रीडाया अनन्तरं मद्यपानं कृत्वा स्वस्त्रिया सह तालादिसहितमनेकप्रकारं गानमत्र भवति। कदाचिच्चोड्डुनादिकमपि स्यात्[१]।

३३ नौक्रीडा—गृहतुल्यासु नौकासु क्रीडैषा प्रवर्तते। अन्नपानाद्यनेकसाहित्ययुता उद्यानकृत्रिमपर्वतदीर्घिकादिसहिताश्च महत्यो नौका निर्मीयन्ते स्म। तत्रानेकान्नपानादिभक्षणपूर्विका अनेकस्त्रीभिः सह नृत्यादिकाः क्रीडाः प्रचलन्ति[२]।

३४ उदकक्रीडनकम् (जलगृहक्रीडा)—एकं गृहं स्थलेऽर्धं जले चार्धं निर्माय तत्र भक्ष्यभोज्यादिकं च सर्वमपि संस्थाप्य तत्रानेकप्रकारेण क्रीडित्वा भक्ष्यं भोज्यं स्वयं भक्षयित्वा परस्य मुखेऽपि प्रवेश्य ग्रासमनेकरीत्या जले स्थले च क्रीडन्ति[३]।

---

(१) "कादम्बरीपानमदोत्कटस्तु बलः पृथुश्रीः स चुकूर्द रामः।
सहस्ततालं मधुरं समं च स्वभार्यया रेवतराजपुत्र्या॥
तं कूर्दमानं मधुसूदनश्च दृष्ट्वा महात्मा च मुदान्वितोऽभूत्।
चुकूर्द सत्यासहितो महात्मा हर्षागमार्थं च बलस्य धीमान्॥" (हरि० वि० ८९, १६-१७) 'तथा कुर्दखुर्दगुर्दगुदक्रीडायामेव (पा० धातु०)

(२) "नौभिर्गृहप्रकाराभिश्चित्रक्रीडुरपराजिताः…………।
उद्यानानि सभावृक्षा दीर्घिकाः स्यन्दनानि च॥
निवेशितानि शिल्पानि तादृशान्येव सर्वथा॥" (हरि० वि० ८८, ६८…)

(३) "ततो जलविहारार्थं कारयामास भारत।
चैत्रकम्बलवेश्मानि विचित्राणि महान्ति च॥
सर्वकामसुपूर्णानि……… ।
उदकक्रीडनकं नाम कारयामास भारत।
भक्ष्यं भोज्यं च पेयं च चोष्यं लेह्यमथापि च।
परस्परस्य वक्त्रेभ्यो ददुर्भक्ष्यास्ततस्ततः॥" (भारत आदि० १२८, ३१)

CC.O Sampurnanand University Collection. Digitized by eGangotri

३५ वनविहारक्रीडा—अस्यां क्रीडायां युवदम्पतीनामितस्ततो गमनं क्वचिच्च सखीभिः सह सङ्घर्षेणेतस्ततो धावनं क्वचिच्चाक्षिनिमीलनादिकं क्वचिच्च पुष्पावचयादिकं चानुष्ठीयते[1]।

३६ आमलकमुष्ट्यादिक्रीडा—यत्र हस्ते कान्यप्यामलकादिफलानि धृत्वा मुष्टिं प्रबध्य कश्चित्कंचित्पृच्छति, कथय कति फलानीति ?। स यदि सम्यक्तया कथयति तदा हस्तस्थितानि सर्वाण्यपि फलानि सत्यवक्ता विजेता स्वीकरोति, यदि मिथ्या स्यात्तदा प्रतियुग्ममेकैकं फलं पराजेता मिथ्यावादी ददाति। एषा क्रीडा यथोक्तनाम्ना कथ्यते[2]।

३७ दर्दुरप्लावक्रीडा—इयं च क्रीडा देशभेदेनानेकप्रकारिका भवति। तस्यां दर्दुरवत्-मण्डुकवत्प्लवनं भवति। सर्वे बालकाः सर्वा बालिका वा कुत्रचिदेकस्मिन् स्थले दर्दुरवच्छरीराकृतिं निर्माय उपविश्य निश्चितावधिस्थानपर्यन्तं सर्वे दर्दुरवदुत्प्लुत्योत्प्लुत्य युगपदेव गच्छन्ति। तत्र यः प्रथमतो निर्दिष्टस्थलं प्राप्नोति तस्य जयो भवति। कुत्रचिद्देशे हरिणवत्क्रीडन्ति। "हरिणाक्रीडनकम्" क्रीडा त्वस्यैव प्रकारविशेषः। क्वचिच्च कुक्कुटवत्प्रचलन्ति। महाराष्ट्रदेशे बालिकाः कुक्कुटवत्सर्वाः शरीराकृतिं निर्माय स्थित्वा निश्चितावधिपर्यन्तं युगपद्गच्छन्ति। नाम च तस्य खेलस्य महाराष्ट्रदेशे तद्भाषीयं "कोंवडा" इति प्रसिद्धम्[3]।

---

(१) शिशुपालवधकाव्यस्य सप्तमसर्गे विशेषरूपेण वर्णनमुपलभ्यतेऽस्याः क्रीडायास्तत्तत एवावधार्यम्।

(२) "क्व चामलकमुष्टिभिः" (भाग० १०, १८, १४) लौकिक्येषा क्रीडा सर्वत्र प्रसिद्धतरा।

(३) "क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः"। (भाग० १०, १८, १५) प्रसिद्धैषा क्रीडा देशभेदेनानेकप्रकारा।

CC.O Sampurnanand University Collection. Digitized by eGangotri

३८ नाट्यक्रीडा—अत्र बालका बालिका वा स्त्रीपुरुषाणामनेकप्रकारकवेषं धृत्वा खेलन्ति[1]। अयं तु खेलः परस्परसन्तोषार्थं एव न तु समाजे लोकदर्शनार्थम्।

३९ अलातचक्रक्रीडा—अलातचक्रशब्दप्रयोगः प्रायो वेदान्तादिग्रन्थेषु भ्रमनिदर्शनार्थमागतो लभ्यते। परन्त्वलातचक्रशब्दस्य विशेषतो विवरणं नोपलभ्यतेऽर्थस्य लोकप्रसिद्धत्वात्। लोके च बालका अन्ये वा क्रीडकाः सतैलयुतकर्पटकेनोभयतो बद्धां यष्टिमग्निना प्रज्वाल्य सज्वालां तां मण्डलाकारं चालयन्ति तेन यदग्निचक्रं निर्मितं भवति तदेवालातचक्रपदेन गीयते। सा च क्रीडोपलभ्यतेऽधुनापि क्वचित्।

४० गदागदि—इदं च गदया गदया प्रवृत्तं परस्परं युद्धम्। परन्तु युद्धात्प्राग् यदा खेलनस्याभ्यासो भवेत्तदैव युद्धेऽपि गदाप्रयोगः सम्यक्तया कर्तुं शक्य इत्यभिप्रायेण युद्धात्प्रागभ्यासः खेलनरूप इति कृत्वा खेलनिबन्धे संग्रहः कृत इति द्रष्टव्यम्। युद्धप्रकारेण खेलनप्रकारोऽप्यनुसन्धेयः[2]। एवमनेके खेलाः संभवन्ति।

---

(१) "पुंवेषनायिकाः काश्चिन्मौलिकुण्डलमण्डिताः।
नृत्यन्तः कृष्णपुरतः श्रीकृष्ण इव मैथिल॥
राधावेषधरा गोप्यः शतचन्द्राननप्रभाः"। ………॥ (गर्ग सं० खं० २ अ० २९, २२-२३)

(२) "भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि।
अवञ्चयत्तिरश्चीनो योगारूढ इवान्तकम्॥
पुनर्गदां स्वमादाय भ्रामयन्तमभीक्ष्णशः।
ततश्च गदयारातिं दक्षिणस्यां भुवि प्रभुः।
एवं गदाभ्यां गुर्विभ्यां हर्यक्षो हरिरेव च"॥ इ० (भाग० ३, १४, १८-१९)
तथा हरिवंशे हरिवंशपर्वणि ९० अध्याये—
"स मण्डलानि चित्राणि दर्शयामास केशवः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

४१ अशोकपादप्रहारः—कविसंप्रदायः किल एषः । यदशोकवृक्षो नुपुरालक्तकचरणेन कन्यया ताडनीयः, तदनन्तरमयं पुष्प्यति । अयं च क्रीडाप्रकारः क्वचित्क्वचिदुपलभ्यते[1] ।

४२ चित्रक्रीडनकम्—विरहावस्थायां, अन्यदा वा परिचितजनज्ञानार्थं प्राक्तनवृत्तं द्रष्टुं वा प्रायः प्राक्तनलिखितं नूतनं वा निर्माय चित्रं तद्‌दृष्ट्वा मनोविनोदोऽनुष्ठीयते । अयं प्रकारः क्वचित् क्वचिन्नाटक उपलभ्यते[2] ।

४३ काव्यशास्त्रविनोदः—अयं विनोदप्रकारः प्रायः पण्डितेषु प्रचलति स्म । अस्मिन् शास्त्रचर्चा, समस्यापूर्तिः नूतनश्लोकनिर्मितिः प्रहेलिकादिविषयाः समायान्ति[3] । लोकेऽपि स्त्रीषु "पहेली, उखाणे" इत्यादिशब्दैरयं प्रकारः भिन्नभिन्नदेशेषु भिन्नभिन्ननाम्ना व्यवह्रियते ।

४४ वाजिवाह्यालिविनोदः—लोके 'पोलो' नाम्ना प्रसिद्धैषा क्रीडा[4] ।

कौमोदकीं महाबाहुर्लीलया युद्धकोविदः ॥
तथैवासुरमुख्योऽपि गदां तां बहुकण्टकाम् ।
शिक्षया भ्राम्यमाणोऽथ मण्डलानि चचार ह ॥" (३९-४९)

(१) मालविकाग्निमित्रनाटकस्य तृतीयाङ्को द्रष्टव्यः ।

(२) शाकुन्तलनाटकस्य षष्ठोऽङ्कः, उत्तररामचरितस्य प्रथमोऽङ्कः, भागवते उषाचरित्रं (१०, ६२, १९) च द्रष्टव्यम् । एवमन्यत्रापि ।

(३) 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्' । अस्मिन् विषये भोजप्रबन्धादि द्रष्टव्यम् ।

(४) मानसोल्लासग्रन्थे द्वितीयभागे विशेषरूपेण वर्णनमस्योपलभ्यते (सोमेश्वरकृतोऽयं ग्रन्थः, सोमेश्वरकालश्च सन् ११३१) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

द्वितीयप्रकारस्थाः क्रीडाः ।

१ नृत्यक्रीडा—इयं देवयात्रोत्सवादिषु राजसंसदि विशेषसमाजे च प्रचलति[1] ।

अतीव प्रसिद्धैषा । प्रायः सर्वत्र पुराणेषु देवजयानन्तरं गायनं अप्सरसां च नृत्यं "ननृतुश्चाप्सरोगणाः" इत्यादिनोपलभ्यते । तथेन्द्रसंसद्यपि नृत्यं प्रचलतिस्मेत्यनेककथाप्रसङ्गतो ज्ञायते । अत्र नृत्यनृत्तरूपं भेदद्वयमुपलभ्यते[2] ।

२ नाट्यम्—किमपि चरित्रमुद्दिश्य तदनुकारिभिरनुकार्यपुरुषादिवत्समाजेऽनुष्ठीयते। प्रायो रामकृष्णलीलाः पूर्वं प्रचलन्ति स्म, श्रीमद्भागवतेऽभिनय उपलभ्यते । तथान्यत्रापि[3] ।

३ मल्लक्रीडा—बहुजनसमाजे यदा मल्लक्रीडा प्रचलति, ततः पूर्वं धनुर्यज्ञादिसंज्ञको यज्ञः क्रियते स्म । प्रेक्षकोपवेशनार्थं यथायोग्यं

---

(१) स्कन्दपुराणे कौमुदीमहोत्सवे—
"प्रातः प्रभृति राजा च आज्ञापयति कौमुदीम् ।
गायन्तु गायकाश्चैव नृत्यन्तु नटनर्तकाः ॥" इत्यादि ।

(२) घटादिगणे 'नटनृत्तौ' इतिपठितं तत्रायं कौमुद्यां विचारः—
'घटादौ तु नृत्यं नृत्तं चार्थः । यत्कारिषु नर्तकव्यपदेशः । पदार्थाभिनयो नृत्यम् ।' गात्रविक्षेपमात्रं नृत्तम् ' इति ।

(३) "रामायणं महाकाव्यमुद्दिश्य नाटकीकृतम् ।
ऋष्यशृङ्गश्च शान्ता च तथारूपैर्नटैः कृताः ।
तत्कालजीविनो वृद्धा दानवा विस्मयं गताः ॥" (हरिवं० ३९,९३)

तथा—'अख्यातोपयोगे' (पा० सू० १, ४, २९) उपयोग इति किमर्थम्—नटस्य शृणोति । इति पातञ्जलमहाभाष्यम्, तथा 'गायन्ननुस्मरन्कर्म जन्म चाभिनयन्मुहुः ।' (भाग० ११,११,२३) इत्यादि द्रष्टव्यम् ।

तथा 'नटभूमिश्च कर्तव्या' इति विष्णुधर्मोत्तरे यात्राप्रकरणम्, भरतमुनिकृतं नाट्यशास्त्रं च विशेषतो द्रष्टव्यम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्थलं निर्माय तत्र स्त्रीबालकवृद्धतरुणोपवेशनार्थं सम्यगुच्चवस्थां कुर्वन्ति स्म। तथा मल्लानां शरीरार्द्रतानाशार्थं तत्र तत्र करीषादिकं संस्थाप्य जलं स्थापयन्ति स्म। ततो मल्लयुद्धनियमानुसारं महताऽऽवेशेन युद्धं प्रचलति स्म। अस्य सम्यग्वर्णनं भारते विराटपर्वणि जिमूतभीमयुद्धे, जरासन्धभीमयुद्धे-कृष्णचाणूरयुद्धे विस्तृतमुपलभ्यते[1]।

४ ऐन्द्रजालक्रीडा—इयं च शत्रुषु भीत्युत्पादनार्थं क्रियते स्म। उक्तञ्च कौटिल्येन—

अनिष्टैरद्भुतोत्पातैः परस्योद्वेगमाचरेत्।
आराज्यायेति निर्वादः समानः कोप उच्यते ॥ अ० २ अधि० १४।

एषा च क्रीडानेकोपायैः सिद्ध्यति—यथा खद्योतचूर्णं सर्षपतैलयुक्तं रात्रौ प्रज्वलति। एवमनेकप्रकारेणाकाशस्था ज्वालाः, भूमौ चानेकराक्षसप्रभृतीन् प्रदर्श्य शत्रुषु भीतिरुत्पाद्यते[2]।

---

(१) "जीमूतं नाम तं तत्र मल्लं प्रख्यातविक्रमम्......... ।
उभौ परमसंहृष्टौ मत्ताविव महागजौ ॥ कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसंकटैः।"
(विराटपर्व अ० १३, १४-४०)

"तस्मिन्प्रविष्टो ददृशे धनुरैन्द्रमिवाद्भुतम्।" (भाग० १०, ४२)

"योऽयं करीषधर्मश्च तोयधर्मश्च रङ्गजः ॥" (हरि० ३०,१३)

(२) कौटिलीयार्थशास्त्रे-'खद्योतगण्डूपदं चूर्णं समुद्रजन्तूनां भृङ्गकपालानां खदिरकर्णिकाराणां पुष्पचूर्णं वा शकुनकङ्कुतैलयुक्तं तेजनचूर्णम्, पारिभद्रत्वङ्मषीमण्डूकवसया युक्ता गात्रप्रज्वालनमग्निना' इत्याद्यधिकरणसमाप्ति यावद् द्रष्टव्यम्। (अ० २ अधि० १४)

तथा भागवते—'शुश्राव शब्दं जलधेरिवेरितं
नभस्वतो दिक्षु रजोऽन्वदृश्यत ।
क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः।
विस्फुरित्तडितो दिक्षु त्रासयन् स्तनयित्नुना ॥
अहयोऽशनिनिःश्वासा वमन्तोऽग्निं रुषाक्षिभिः।
ससृजुस्तिग्मगतय आसुर्या माययासुराः" ॥ (४, १०, २१-२८)

CC.O Sampurnanand University Collection. Digitized by eGangotri

५ समाह्वयक्रीडा—इयं चोभयप्रकारिका सपणबन्धा पणबन्ध-रहिता च। तत्र या पणबन्धरहिता सा क्रीडाशब्देन व्यवह्रियते[१]। तत्र पणबन्धनपूर्वकसमाह्वयक्रीड़ाप्रकारः ताम्रचूडयुद्धरूपः—दश-कुमारचरिते पञ्चमोच्छ्वासे दरीदृश्यते[२]। एतच्च पणबन्धपूर्वकं समाह्वयं द्यूतं च मनुना निषिद्धम्-द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेदिति। तत्र केवलं क्रीडारूपं न निषिद्धम्। हरिवंशेऽपि प्राणिनां परस्परंक्रीडनकं दृश्यते[३]। समाह्वयस्तु मल्लमेषमहिषादिभिरपि क्रियते स्म[४]।

६ मनुष्यपशुयुद्धम्—एतच्चापणबन्धपूर्वकं क्रीडारूपं भारते श्रीमद्भागवतादिषु च दरीदृश्यते[५]। तत्र मत्तहस्तिभिः क्रूरव्याघ्रादिभिः सह मनुष्यस्य युद्धं प्रचलति स्म। तत्र हस्तिनः पुच्छं धृत्वा

"चतुरङ्गबलं राजा इन्द्रजालेन दर्शयेत्।
सहायार्थमनुप्राप्तान्दर्शयेत्त्रिदिवौकसः॥
रक्तवृष्टिश्च सन्दर्श्या परेषां शिबिरं प्रति।
छिन्नानि रिपुशीर्षाणि प्रासादाग्रेषु दर्शयेत्"॥ (वि० ध० उ०)

(१) उक्तं च वीरमित्रोदये राजनीतिप्रकाशे—
'पणपूर्वं यत्क्रियते तदेव द्यूतं समाह्वयश्च। अपणपूर्वके तु न द्यूतसमाह्वयशब्दौ प्रवर्तेते। तयोर्लोके क्रीडाशब्देन व्यवहारात्। अत एव तयोर्लोके विगानाभावः'। इति।

तथा मत्स्यपुराणे—"क्रीडानिमित्तं नृपतिर्धारयेन्मृगपक्षिणः"। इति

(२) 'मार्गे च महति निगमे नैगमानां ताम्रचूडयुद्धकोलाहलो महानासीत्। इत्यादि (१९७ पृष्ठं निर्णयसागरमुद्रितं द्रष्टव्यम्)

(३) "सकरीषाङ्गराजीषु व्रजरथ्यासु वीर्यवान्।
वृषाणां जातदर्पाणां युद्धानि समयोजयत्"॥ (हरि वं० २, २०, १६)

(४) 'प्राणिद्यूते-मल्लमेषमहिषादिनिर्वर्त्यं' इत्यादि मिताक्षरायाम् (२, १७)

(५) 'यदास्य तुल्यः पुरुषो न कश्चित्तत्र विद्यते। ततो व्याघ्रैश्च सिंहैश्च

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रक्रीडय स नाश्यते स्म। अन्यैरपि प्राणिभिर्युद्धमनेकप्रकारकं भवति स्म[1]।

७ शस्त्रविद्याप्रदर्शनम्—अनेकजनसमुदायमध्ये नूतननिर्मितरङ्गस्थले चानेकप्रकारेणाधीतशस्त्रविद्यायाः प्रदर्शनं क्रियते। श्रीमद्भारते पाण्डवानां कौरवाणां च परीक्षा एवं प्रकारेणैव भीष्मादीनां पुरतो द्रोणाचार्येण प्रदर्शिता[2]।

८ ऐन्द्रजालिकक्रीडा—सर्पादिसाधनैरनेकप्रयोगैरेषा क्रीडा जनसमाजेऽनुष्ठीयते। अस्या विस्तृतं विलक्षणमद्भुतं च वर्णनं दशकुमारचरिते पूर्वपीठिकायां पञ्चमोच्छ्वासे सुस्फुटं दरीदृश्यते[3]।

द्विरदैश्चाप्ययोधयत्॥ पुनरन्तःपुरगतः स्त्रीणां मध्ये वृकोदरः। योध्यते स विराटेन सिंहैर्मत्तैर्महाबलः" ॥ इति (भारते वि० १३,४१-४२)।

"एवं निर्भर्त्सितोऽम्बष्ठः कुपितः कोपितं गजम्। चोदयामास कृष्णाय कालान्तकयमोपमम्''।................'' इत्यादि (भाग० १०,४२,४-८)

"सन्निकृष्टे ततो नागे गर्जमाने यथा घने। सहसोत्पत्य गोविन्दश्चक्रे तालस्वनं प्रभुः॥ ....॥ कृष्णस्तु तेन नागेन क्रीडित्वा शिशुलीलया। निधनाय मतिं चक्रे कंसद्विष्टेन चेतसा'' (हरिवं० २९, २७-३३)।

(१) वृषभेण सह युद्धम्—''गृहीत्वापरपादाभ्यां सहलाङ्गूलमच्युतः। भ्रामयित्वा......"(भाग० १०, ११, ४३)।

"अश्वेन सह युद्धम्—तस्योत्सिक्तस्य बलवान् कृष्णोऽप्यमितविक्रमः। बाहुना भोगिनं कृत्वा मुखे क्रुद्धः समादधत्॥" (ह० २९, ६६)

(२) "कृतास्त्रान् धार्त्तराष्ट्रांश्च पाण्डुपुत्रांश्च भारत। दृष्ट्वा द्रोणोऽब्रवीद्राजन् धृतराष्ट्रं जनेश्वरम्.........ते दर्शयेयुः स्वां शिक्षां राजन्ननुमते तव॥''.........

(भार० आदि १३४-१३९ अध्यायौ द्रष्टव्यौ)।

(३) 'ऐन्द्रजालिकः समागतः, इति द्वारस्थैर्विज्ञापितेन........, तदनु विषमं विषमुल्बणं वमन्तः फणालङ्कारणा रत्नराजिनीराजितराजमन्दिराभोगा भोगिन'...... इत्यादिकं महत्तत एव द्रष्टव्यम्।

CC.O Sampurnanand University Collection. Digitized by eGangotri

६ वैवाहिकपणबन्धनम्—विवाहे कन्यास्वयंवरप्रसङ्गे प्रायः क्षत्रियेषु पणबन्धव्यवहार आसीत्। तदनुसारेण सर्वापेक्षया विशिष्टबलस्य कौशलस्य च परीक्षार्थं कमपि पणं निश्चिन्वन्ति स्म। विवाहार्थं मिलितानां जनानां तदवलोकेन मनोविनोदो भवतीति कृत्वा क्रीडासंकलने तेषामपि संग्रहः कृतः।

धनुर्भङ्गः—(१) रामायणे सीताविवाहार्थं धनुःप्रत्यञ्चार्पणरूपः पण आसीत्। स च लोकविशिष्टेन रामेण संपादितः[१]।

मत्स्यवेधः—(२) अयं पणो द्रौपदीस्वयंवरे द्रुपदेन संस्थापितः। स च लोकविलक्षणेन धनुर्धारिणार्जुनेन संपादितः[२]।

वृषभदमनम्—(३) अयं पणो नाग्नजितीविवाहे नग्नजिद्राज्ञा संस्थापितः, सच भगवता कृष्णेन संपादितः[३]।

आजिधावनम्—(४) अयं पणः सूर्येण स्वपुत्र्याः सूर्याया विवाहार्थं स्थापितः, सचाश्विनीकुमाराभ्यां संपादितः[४]।

---

(१) जनक उवाच—"यद्यस्य धनुषो रामः कुर्यादारोपणं मुने।
सुतामयोनिजां सीतां दद्यां दाशरथेरहम्॥" (वा० रा० १, ६६, २६)

(२) "विव्याध लक्ष्यं निपपात तच्च छिद्रेण भूमौ सहसातिविद्धम्।" इति (भार० आ० १८८, २१)

(३) राजोवाच—"किं त्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ।
पुंसां वीर्यपरीक्षार्थं कन्यावरपरीक्षया॥ सप्तैते गोवृषा वीर दुर्दान्ता दुरवग्रहाः।" (भाग० १०, ५८, ४१-४७)

(४) नीतिमञ्जर्याम्—"प्राप्नुयाद्विजयं सत्यात्तस्मात्सत्यं समाचरेत्।
नासत्यावश्विनौ सूर्यां देवेभ्यो जिग्यतुः पुरा॥" ४९॥

तथाच ऋग्वेदे—

'आवां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयन्ती। विश्वेदेवा अन्वमन्यन्त हृद्भिः समु श्रिया नासत्या सचेथे॥' (ऋ० १,११६,१७)

सविता स्वदुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत्। तां सूर्यां सर्वे देवा वरयामासुः। तेऽन्योन्यमूचुः। आदित्यमवधिं कृत्वाऽऽजिं धावाम। योऽस्माकं मध्ये

CC.O Sampurnanand University Collection. Digitized by eGangotri

पृथ्वीप्रदक्षिणा—(५) अहिल्यावरणार्थं ब्रह्मदेवेन पृथ्वीप्रदक्षिणारूपो पणः संस्थापितः, सच गौतमेन संपादितः[1] ।

एवमन्येऽपि पणवन्धा दरीदृश्यन्ते[2] ।

१० काष्ठचित्रक्रीडनकम्—पूर्वस्मिन् काले काष्ठानामनेकप्राणिनो निर्माय यन्त्रादिना सूत्रेण वा तेषां प्रचालनं कृत्वा खेलनं कुर्वन्ति स्मेति ज्ञातुं शक्यते। पञ्चतन्त्रे प्रथमतन्त्रे पञ्चमकथायां तादृशयन्त्रादिरूपोपलब्धेः । एवं च काष्ठचित्रक्रीडाप्यासीत्[3] ।

तृतीयप्रकारस्थाः क्रीडाः ।

१ मार्गपालीवन्धनम्—कार्त्तिकशुक्लप्रतिपदि कृत्यमिदम् । मार्गपालीनाम कुशकाशमयीं दीर्घां वहुलम्बकयुतां रज्जूं निर्माय पूर्वस्यां दिशि तुङ्गे पादपे स्तम्भे वा प्रवध्य तस्यास्तलतः सन्ध्यासमये गजाश्वादिकं नयेद्यथा तस्या उल्लङ्घनं भवेत्। तथा राजानो राजपुत्राश्च ब्राह्मणाः शूद्राश्च मार्गपालीसमुल्लङ्घनं कुर्वन्तिस्म[4] ।

उज्ज्येष्यति तस्येयं भविष्यति । तत्राश्विनावुदजयताम्, सा च सूर्या जितवतोस्तयो रथमारुरोह। "अथ यत्र ह तत्सविता सूर्यां प्रायच्छत्सोमाय राज्ञे" इत्यादिब्राह्मणम्। (कौ० ब्रा० ७८।१)

(१) "तस्मैं सा दीयते सुभ्रूः यः पृथिव्याः प्रदक्षिणाम् ।
कृत्वोपतिष्ठते पूर्वं नचान्यस्मै पुनः पुनः" ॥ (ब्रह्मपुराणम् ८७,१६)

(२) अश्वानयनं भारते जरत्कारुविवाहप्रसङ्गे । तथान्यदपि द्रष्टव्यम् ।

(३) कौलिकार्थं रथकारः कीलसंचारिणं वैनतेयं निर्मितवान् । इत्यादि तत्रैव द्रष्टव्यम् ।

(४) निर्णयसिन्धौ स्कन्दपुराणीयं वचनम्—
"ततोऽपराह्णसमये पूर्वस्यां दिशि भारत ।
मार्गपालीं प्रबन्धीयात्तुङ्गे स्तम्भेऽथ पादपे ॥
कुशकाशमयीं दिव्यां लम्बकैर्बहुभिर्मुने ।
दर्शयित्वा गजानश्वान्सायमस्यास्तले नयेत् ॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

२ वष्टिकाकर्षणम्—मार्गपालीबन्धनस्याङ्गभूतमिदम्। कुशकाशमयीं सुदृढां नवां रज्जुं निर्माय तस्या एकतो हीनवर्णा अन्यत्र राजपुत्राश्च स्थित्वा तां प्रगृह्य यथाबलं मुहुर्मुहुः कर्षयन्ति। यदि हीनजातिजयो भवेत्तदा राज्ञो यावद्वत्सरं जय इति संकेतः[१]।

३ गोक्रीडनकम्—इयं च क्रीडा कार्त्तिकशुक्लप्रतिपदि क्रियते। तत्र स्वकीयं गोमहिष्यादिकं सर्वं सम्यक् संभूष्य साध्वन्नादिकं च भोजयित्वा महतानन्देनेतस्ततो नीयते[२]। अधुना तु कुत्रचित् सहस्राधिको गवां समूहो इतस्ततो नीयते।

४ बलिराज्योत्सवः—कार्त्तिकशुक्लप्रतिपद्[३] बलिप्रतिपद्। तस्यां प्रातः काले पणबन्धपूर्वकं द्यूतं कर्तव्यम्। तस्मिन् द्यूते यस्य जयो भवति तस्याऽऽसंवत्सरं जयो भवति। विपरीते विपरीतम्। रात्रौ च पञ्चरङ्गकैः शय्यायां शुक्लतण्डुलैर्बलिं विधाय पूजनं कुर्वन्ति। इतस्ततश्च दीपप्रज्वलनं विदधति[४]।

राजानो राजपुत्राश्च ब्राह्मणा शूद्रजातयः।
मार्गपालीं समुल्लङ्घ्य निरुजः स्युः सुखान्विताः" ॥

(१) तथा तत्रैवादित्यपुराणे—
"कुशकाशमयीं कुर्याद्वष्टिकां सुदृढां नवाम्।
तामेकतो राजपुत्रा हीनवर्णास्तथान्यतः ॥
गृहीत्वा कर्षयेयुस्तां यथासारं मुहुर्मुहुः।
जयेऽत्र हीनजातीनां जयो राज्ञस्तु वत्सरम्" ॥

(२) "गोमहिष्यादि यत्किञ्चित्तत्सर्वं भूषयेन्नृपः"। (पुरुषार्थचिन्तामणौ बल्युत्सवः

(३) "प्रतिपद्दर्शसंयोगे क्रीडनन्तु गवां स्मृतम्"। (निर्णयसिन्धौ देवलवचनम्)

(४) "तस्माद्द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः ॥
तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः।
पराजयो विरुद्धश्चेल्लाभनाशकरो भवेत् ॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

५ अक्षक्रीडा (राजसूययागः) राजा राजसूयं यज्ञं करोति तदा तेन राजसूययज्ञाङ्गमक्षक्रीडनकमवश्यं धर्मायानुष्ठातव्यम्[1]। तस्या अक्षक्रीडायाः प्रकारस्त्वधुना यथा लोकाः क्रीडन्ति तथैव विद्यते स्म।

६ आजिधावनम् (वाजपेययागः)—इयं रथधावनरूपा क्रीडा आजिधावनशब्देन वैदिकैः कथ्यते। वाजपेययागाङ्गभूतैषा। औदुम्बरी शाखा धावनावधिमर्यादाद्योतनायोपहिता कल्प्यते, तां प्रति गन्तुं रथ उपविष्टा रथिका अहमहमिकया शीघ्रं रथान् धावयन्ति[2]। इयं यथोक्तशब्देन भण्यते। अत्राजिशब्देन स्पर्धोच्यते।

७ वंशनृत्यम् (नरमेधः) नरमेधसंज्ञको यागविशेषः। तत्रानेकमनुष्यपशवो निर्दिष्टाः। तत्र सर्वेषां मनुष्यपशूनां पर्यग्निकरणानन्तरं यूपेभ्यो विमुच्योत्सर्गो विहितः। तत्रान्तरिक्षदेवतायै वंशनर्तिरूपः पुरुषः पशुर्विहितोऽस्ति। स च वंशेन नर्तनशीलवान्।

बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः।
लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतण्डुलैः।" (निर्णयसिन्धौ बल्युत्सवः)।

(१) "अक्षैर्दीव्यति" राजसूययागीयाक्षक्रीडनविधायिका श्रुतिः।

(२) आजिं शीघ्रं यन्ति" (कात्यायनश्रौतसूत्रम् अ० १४-३) तट्टीका च। "प्र पर्वतानामुशती उपस्था दश्वे इव निषिते हासमाने। गावेव शुभ्रे मातरो रिहाणे विपाट्छुतुद्री पयसा जवेते" अस्मिन् मन्त्रे विपाट्छुतुद्री नद्यौ परस्परं अश्ववत् स्पर्धमाने समुद्रं गच्छत इति वर्णनमुपलभ्यते तेन तर्क्यतेऽश्वधावनं क्रीडाविशेषरूपमपि तदा स्यादिति। (ऋग्वे० मं० ३ सू० ३३)

तथा—"तस्मिन् देवा न समजानते ममेदमस्तु ममेदमस्त्विति। ते सञ्ज्ञानाना अब्रुवन्नाजिमस्यायामहै स यो न उज्जेष्यति तस्येदं भविष्यतीति" (ऐ० ब्रा० २, २,१)

अस्मिन् ब्राह्मणे "रेसेस" संज्ञकखेलस्योल्लेखो विद्यते। आजिशब्देनाश्वधावनस्थलं स्वीक्रीयते। तथा (घुड़दौड़) छान्दोग्येऽपि समर्यादधावनप्रकार उपलभ्यते 'आजेः सरणम्' इति। (छान्दो० १, ३, ५)

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवं च वंशाधारेणानेकप्रकारकं नृत्यमपि तदा खेलनरूपं स्यादिति अनुमीयते[१] ।

८ इन्द्रध्वजोच्छ्रायः—इन्द्रकेतुसंज्ञकमिन्द्रदेवताकं महान्तं ध्वज-मुत्थाप्य तस्य पूजनं विधाय नटनर्तकादिभिरनेकखेलनं विधाय पञ्चमे दिवसे राजा चतुरङ्गबलयुतो हस्तिभिर्ध्वजं नदीतीरे नीत्वा तं तत्र प्रवाहयेत् । तदा जले पौरा जानपदा अनेकप्रकारिकां क्रीडां कृत्वा जलतीरे महान्तमुत्सवं कुर्वन्ति[२] ।

९ कौमुदीमहोत्सवः—राजा कौमुदीमहोत्सवं कर्तुं सर्वान् जनानाज्ञापयति तथा नटनर्तकगायकानां तत्तत्कर्माणि योग्यानि तत्र प्रचलन्ति । 'तथा तरुणाः तरुणीभिः सह रममाणाः हसन्तश्च समन्तात्पर्यटन्तु' इत्याज्ञां प्रदाय राजा महता समारम्भेणायमुत्सवः प्रचालयति स्म[३] ।

---

(१) "अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वꣳश-नर्तिनम्" (शुक्लयजुर्वेदसंहिता ३०, २१) ।

अत्र महीधरभाष्यम्—अन्तरिक्षाय वंशनर्तिनम्-वंशेन नर्तनशीलम् । तथा ब्राह्मणादीनां पर्यग्निकरणानन्तरमिदं ब्रह्मणे इदं क्षत्रायेत्येवं सर्वेषां यथा स्वस्व-देवतोद्देशेन त्यागः । ततः सर्वान् ब्राह्मणादीन् यूपेभ्यो विमुच्योत्सृजति ।

(२) "नटनर्तकसंकीर्णं तथा पूजितदैवतम् ।......

पञ्चमे दिवसे प्राप्ते शक्रकेतुं विसर्जयेत् ।

पूजयित्वा महाभाग बलेन चतुरङ्गिणा ॥

नीत्वा करीन्द्रैस्त्रितयं ततो नद्यां प्रवाहयेत् ॥

पौरा जानपदास्तत्र क्रीडां कुर्युस्तदाम्भसि ।

उत्सवं च तदा कार्यं जलतीरगतैर्महत् ॥"

(वीरमित्रोदये राजनीतिप्रकाशे विष्णुधर्मोत्तरम्)

(३) "प्रातःप्रभृति राजा च आज्ञापयति कौमुदीम् ।

देवरात्रिं च देवस्य रुद्रस्यासुरनाशिनीम् ॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

१० गवोत्सर्गः (उत्सवः) कार्तिकशुक्लप्रतिपदि गवोत्सर्गरूप उत्सवोऽनुष्ठीयते स्म। मनोरमे स्थाने पूर्वपश्चिमदिश्योः स्तम्भद्वय-समारोपं कृत्वा शरवंशसंभवां, दर्भमयीं वा दीर्घां रज्जूं कम्बलयुतां सम्बध्य तत्रोभयोः पार्श्वयोर्विप्रा वेदध्वनिं कुर्वाणास्तिष्ठन्ति। तत उत्सर्गं कारयेत्। तत्र प्रथमतो होता यजमानसमन्वितः ततोऽधस्ताद्‌ गच्छति, अनन्तरं ब्रह्मक्षत्रविट्शूद्राः गावः प्रजाः तथा वर्णबाह्या-श्चाण्डालविवर्जिता हास्ययुक्ता गच्छन्ति। एवं कृते सर्वा ईतयो नश्यन्तीति कर्मफलम्[1]।

११ देवयात्रादिमहोत्सवः—प्रतिवर्षमयं विशिष्टदेवताया उत्सवो-ऽनुष्ठीयते। तदर्थं कूटागारं नूतनमनेकघण्टापुष्पमालावस्त्रपताका-दिसमलंकृतं विधाय लोकानामानन्दार्थं मनोविनोदनार्थं च नटभूम्या-दिकं विधाय तत्कूटागारं गजाश्वनरवृषैर्वाहयित्वा सबलयुतो राजा

गायन्तु गायकाश्चैव नृत्यन्तु नटनर्तकाः।
तरुणाः सह योषिद्भिः समन्तात्पर्यटन्तु च।
रममाणा हसन्तश्च गायन्तो नृत्तसेविताः'' ॥
(वीरमित्रोदये राजनीतिप्रकाशे स्कन्दपुराणम्)

(१) "कृष्णपक्षे त्वमावास्या कार्तिकस्य ततः परे।
योऽह्नि कुर्याद्गवोत्सर्गं........................ ॥
स्तम्भद्वयं समारोप्य पूर्वपश्चिमसंस्थितम्।
तत्र दर्भमयी कार्य्या शरवंशभवापि वा ॥
मध्ये कम्बलसंयुक्ता दीर्घरज्जुः सुशोभना।
उभयोः पार्श्वयोर्विप्रा वेदध्वनिसमन्विताः।...... ...॥
प्रथमं गच्छते होता यजमानसमन्वितः।
ब्रह्मक्षत्रविशः शूद्रा स्तथा गावः प्रजाः पुनः ॥
तथान्ये वर्णबाह्यास्तु चण्डालपरिवर्जिताः ॥
......यस्त्वेवं कुरुते राजा।......नश्यन्ति चेतयः सर्वाः" ॥
(वीरमित्रोदये राजनीतिप्रकाशे देवीपुराणम्)

CC.O Sampurnanand University Collection. Digitized by eGangotri

कूटागारस्य पृष्ठतः प्रचलति। यस्य महाजनस्य समीपे स देवो याति तेन भक्त्या पूजनीयः। तस्यां रात्रौ सर्वत्र दीपप्रज्वलनपूर्वकं गीत-नृत्यसमाकुलं महान्तमुत्सवं कुर्वन्ति[1]। तथानेकप्रकारं स्त्रीभिः सह गीतं गीतवन्तः पीतवस्त्रधारिण आवीरारुणचूर्णमुष्टिभिः परस्परं रञ्जयन्तः परस्परमुखं च विलिम्पन्तः खेलन्ति स्म[2]।

१२ होलिकामहोत्सवः—ढुण्ढासंज्ञिका काचिद्राक्षसी तस्याः कृत्रिमशरीरस्य दाहः विशिष्टफलप्राप्त्यर्थं प्रतिवर्षमनुष्ठीयते। तत्र शुष्ककाष्ठसंचयं कृत्वा पूर्णिमायां तस्य प्रज्वलनं विधाय तमग्निं

---

(१) "रङ्गस्थानं तु देवेभ्यो विहितं कारयेत्तथा।
नटभूमिश्च कर्तव्या सर्वदोषविवर्जिता॥
प्राक्षे तु यात्रादिवसे कूटागारं तु कारयेत्।
पुष्पैर्माल्यैस्तथा ... ...॥
घण्टासहस्रनिनदं सर्वशोभासमन्वितम्।
कूटागारं च वोढव्यं गजरश्वैर्नरैर्नृपैः।
सबलेनानुगन्तव्यं राज्ञा देवस्य पृष्ठतः।
यस्य यस्य समीपे तु स देवो याति पूजितः।
तेनातिथ्यं च कर्तव्यं……………॥
महान्तमुत्सवं कुर्याद् गीतं नृत्तसमाकुलम्।
तस्यां रात्रौ ततो दीपाः देयाः शतसहस्रशः"॥
(वीर०राज०ब्रह्मपुराणे देवयात्रा)

(२) "रक्तहस्ताः पीतवस्त्राः कूजन्नूपुरमेखलाः।
गायन्त्यो होलिकागीतीर्गालीभिर्हास्यसंधिभिः॥
आबीरारुणचूर्णानां मुष्टिभिस्ता इतस्ततः।
कुर्वन्त्यश्चारुणां भूमिं दिगन्तं चाम्बरं तथा॥
तन्मुखं च विलिम्पन्त्योऽथाबीरारुणमुष्टिभिः"।
(गर्गसं० खं० ४अ० १२, श्लो० १९-१९)

CC.O Sampurnanand University Collection. Digitized by eGangotri

परितः परिक्रम्य किलकिलाशब्दं कुर्वाणा वालकाः हसन्ति क्रीडन्ति चानेकप्रकारेण[1]।

१३ वसन्तोत्सवः (मदनपूजनम्)—अयं माघशुक्लपञ्चम्यामनुष्ठीयते। तत्र रतिकामयोः पूजनं क्रियते[2]। तत्प्रसङ्गे च तरुण्यः, क्वचित् तरुणास्तरुण्यश्च वनं गच्छन्ति तत्र चानेकप्रकारकं क्रीडनकं विदधति[3]। क्वचित्काव्यादिषु च परस्परं विवाहपूर्वकालिकप्रणयप्रादुर्भावश्च वर्णित उपलभ्यते[4]।

१४ ब्रह्मोत्सवः—अयमुत्सवो मत्स्यदेशेषु सर्वपुरुषसंमत आसीत्। तत्र ब्रह्मदेवतायाः पूजनं विधायानन्तरं तदर्थमागतानां लोकप्रसिद्धमल्लानां नियुद्धक्रीडनकं प्रचलति स्म। तत्रातिमहत्या वीरपद्धत्या युद्ध्यतां मल्लानां महान् कोलाहलः प्रचलति स्म। तत्र युद्धे महता मल्लेन भीमेन सर्वेषां मल्लानां प्राधानभूतो जीमूतो यमालयं प्रापितः[5]।

---

(१) "संचयं शुष्ककाष्ठानामुपलानां च कारयेत्।
तत्राग्निं विधिवद्धुत्वा.......... ॥
ततः किलकिलाशब्दैस्तालशब्दैर्मनोरमैः।
तमग्निं त्रिःपरिक्रम्य गायन्तु च हसन्तु च ॥"

पुरुषार्थचिन्तामणौ भविष्यपुराणम्।

(२) "माघमासे नृपश्रेष्ठ शुक्लायां पञ्चमीतिथौ।
रतिकामौ तु संपूज्य कर्तव्यः सुमहोत्सवः ॥"

(पुरुषार्थचिन्तामणौ निर्णयामृते पुराणसमुच्चयः)

(३) शाकुन्तलस्य षष्ठाङ्कस्य च प्रवेशके वृत्तान्तोऽयं दृश्यते, स तत एव द्रष्टव्यः।

(४) एतच्च दशकुमारचरिते पूर्वपीठिकायां पञ्चमोच्छ्वासेऽवन्तिसुन्दरीचरिते लभ्यते, तत्तत एव द्रष्टव्यम्।

(५) "अथ मासे चतुर्थे तु ब्रह्मणः सुमहोत्सवः।
आसीत् समृद्धो मत्स्येषु पुरुषाणां सुसंमतः

CC.O Sampurnanand University Collection. Digitized by eGangotri

चतुर्थप्रकारयुताः क्रीडाः ।

१ दाण्डाखेलः—दण्डप्रधानिकैषा क्रीडा । क्रीडासंपादनाय दण्डस्य प्रधानतयोपयोगः[1] ।

२ मौष्टाखेलः—मुष्टिप्रधानिकैषा क्रीडा । युद्धसदृशी क्रीडेयं मुष्टिसाध्या [1] ।

३ पाल्लवा—इयं क्रीडा वृक्षस्य वल्या वा कोमलपल्लवैर्निष्पद्यते [2] ।

४ मौसला—इयं च मुसलैर्निष्पद्यते क्रीडा[3] ।

५ उद्दालकपुष्पभञ्जिका—उद्दालकः=श्लेष्मातकस्तस्य पुष्पाणि भज्यन्ते यस्यां क्रीडायां सा उद्दालकपुष्पभञ्जिकापदेनोच्यते[4] ।

तत्र मल्लाः समापेतुः दिग्भ्यो राजन् सहस्रशः ।·········॥

जीमूतं नाम तं तत्र मल्लं प्रख्यातविक्रमम् ।·········॥

प्रत्यपिंषन्महाबाहुर्मल्लं भुवि वृकोदरः" । (भार० वि०, १३, १४-३८)

अयं द्वितीयप्रकारे मल्लक्रीडायां स्थापयितुं योग्योऽपि ब्रह्मदेवताकपूजनप्रधानतया धार्मिकोत्सवेषु स्थापित इति ज्ञेयम् ।

(१) "तदस्यां प्रहरणमिति क्रीडायां णः" (अष्टा० ४, २, ५७) इतिपाणिनीयसूत्रेण निष्पद्यतेऽयं शब्दः । तथा मौष्टाशब्दोऽपि । अत्र कौमुदी-दण्डःप्रहरणमस्यां क्रीडायामिति दाण्डा, मौष्टा, इति । इतोऽधिकोऽर्थविशेषो न ज्ञायते, कदाचिद् लोकप्रसिद्धः 'लाठीखेल मुक्कीखेल' इति स्यात् ।

(२) अयं च "तदस्यां प्रहरण०" इतिपाणिनिसूत्रनिष्पन्नः शब्दः । उल्लेखस्तु अमरकोशे तृतीयकाण्डे लिङ्गादिसंग्रहवर्गे लभ्यते यथा—

'तत्क्रीडायां प्रहरणं चेन्मौष्टापाल्लवाणदिक् ॥ ५ ॥

(३) अत्रैवामरकोशस्य व्याख्यासुधाव्याख्यायामयं शब्दप्रयोगस्तथैव निष्पन्न उपलभ्यते । यथा 'णस्य दिगुदाहरणं नतु परिगणनम् । तेन मौसला, दाण्डा, इत्यादि बोध्यम् । एवं चानेके शब्दाः स्युरित्यनुमीयते ।

(४) "नित्यं क्रीडाजीविकयोः" (पा० २, २, १७) अत्र कौमुद्यामुदाहरणमिदं व्याख्यानं च तत्त्वबोधिन्यां लभ्यते ।

13

CC.O Sampurnanand University Collection. Digitized by eGangotri

६ वारणपुष्पप्रचायिका—वारणपुष्पाणां प्रचयनं यस्यां क्रीडायां विद्यते सा यथोक्तनामिका[१] ।

७ पुष्पक्रीडा—पुष्पैश्च परस्परं क्रीडन्ति स्म । अस्य स्वरूपं तु विस्पष्टतया न ज्ञायते । केवलमुल्लेख एव लभ्यते[२] ।

८ दण्डादण्डि—अयं युद्धस्य प्रकार एवैकः । परन्तु युद्धात्पूर्वमस्याभ्यासस्त्वपेक्षित एव । स च अभ्यासः क्रीडायामन्यत्र वा संभवत्यतोऽस्यात्र संकलनम् । इयं च क्रीडा दण्डप्रहरणवञ्चनाभ्यां भवितुमर्हति[३] ।

९ मुष्टीमुष्टि—पूर्वोक्त इवायं युद्धप्रकारः । इयं च क्रीडा मर्माङ्गे मुष्टिप्रहरणेन ततो वञ्चनेन च संभवति[४] ।

प्रायः संस्कृतसाहित्य उपलब्धाः क्रीडा लिखिता एव, यदि पुनरन्या उपलभ्येरन् तर्हि ता अपि यथासमयं लिख्येरन्निति शिवम् ।

——:o:——

(१) अस्योल्लेखः काशिकायां पाणिनियनित्यंक्रीडेतिसूत्रव्याख्यायामुपलभ्यते । यथा 'उद्दालकपुष्पभञ्जिका, वारणपुष्पप्रचायिका' इति ।

(२) "काश्चित्पुष्पैश्च हरिणा क्रीडां चक्रुः परस्परम्" । (गर्गसं० खं० २, २९, ११)

(३) "तत्र तनेदमिति सरूपे" (पा० सू० २, २, २७) इत्यादिपाणिनिसूत्रनिष्पन्नोऽयं शब्दः ।

(४) तथा—"नियेन मुष्टिहत्यया निवृत्रा ऊणधामहै" । (ऋ० वे० १, ८, २, अथर्ववेद २०, ७०, १८)

तथा—"युष्मदेति मुष्टिहा बाहुजूतो" । (ऋग्वेद ९, ९८, ४)

तथा—"साह्वा ये सन्ति मुष्टिहेव" । (ऋग्वेद ८,२०,२०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

OBJECTS OF OFFERINGS IN THE ŚRAUTA SACRIFICES.

By

Pt. A. CHINNASWAMI SHASTRI,

Prof. of Mīmāṁsā, College of Oriental Learning,
Benares Hindu University.

प्रणम्य वाचं दैवीं तामग्न्यादींश्च हविर्भुजः ।
वैदिकानि हवींष्यत्र सङ्गृह्णामि कुतूहलात् ॥

तत्र तावदस्मत्प्राचीनानामास्तिकपथानुवर्तिनां मरीच्यत्रिवसिष्ठगौतमभरद्वाजप्रभृतीनामृषीणामृषिकल्पानां चास्मत्पूर्वपुरुषाणामद्य यावदयमभेद्यश्चिरप्ररूढमूलस्सिद्धान्तः—यदयं शब्दराशिर्वेदाख्यस्सोऽकृत्रिमः पुरुषदोषलेशासंस्पृष्टः परमेश्वरवत्प्राणिनां चिरप्राप्तदुःखौघविनिवर्तनद्वारा पुरुषार्थप्रापणैकप्रवणस्तांस्तानुद्दिश्याधिकारिणः प्रवृत्तः, तत्तदधिकारानुगुणं पुरुषांस्तत्र तत्र प्रवर्तयन्, अनुष्ठापयंश्च तानि तानि कर्माणि, तज्जनितैस्तैस्तैः फलैः पुरुषं संयोजयतीति । वैदिकसाहित्यविषयेऽत्र यद्यपि पाश्चात्यैः पण्डितवरैर्बहुभिः बहुधा गवेषितम्, यतितं च स्वाशयस्थापने तत्प्रचारणे च तैः, तथापि नास्माकं सिद्धान्तेऽद्यावधि विशेषतो विपरिवृत्तिस्समजनि ।

ब्राह्मणभागकृत्यम्

सोऽयमपौरुषेयश्शब्दराशिर्मन्त्रब्राह्मणात्मना भिन्नो, ब्राह्मणभागेन तत्तद्यागहोमदानस्तुत्युपासनारूपाणि कर्माणि विदधाति । तानि च प्रायेण तत्तद्देवताराधनारूपाण्येव दरीदृश्यन्ते । तत्र यागो

CC.O Sampurnanand University Collection. Digitized by eGangotri

नामाग्न्यादिभ्यो देवताभ्यः चरुपुरोडाशसोमादीनां द्रव्याणां दानम्। तच्च यथाविधि हविस्सम्पाद्य तास्ता देवता आहूय दीयते तत्तद्बोधकशब्दोच्चारणपुरस्सरम्। यथा—इदम् (हविः) इन्द्राय, न मम इत्यादि। अत्र 'इदमिन्द्राये'त्यनेन पुरोवर्तिनो हविष इन्द्रसम्बन्ध आपाद्यते। 'न मम' इत्यनेन तस्मिन् हविषि स्थितस्य स्वसम्बन्धस्य निवृत्तिरुच्यते यजमानेन। एवं स्वस्वत्वनिवृत्तिपूर्वकमिन्द्राय दत्तस्य हविष इन्द्रसमीपप्रापणार्थमग्नौ प्रक्षेपः क्रियते। स्वस्मिन प्रक्षिप्तं हविरग्निस्तत्तद्देवसमीपं प्रापयति। ते च देवास्तद्भुञ्जते तृप्यन्ति चेति याज्ञिकसमयः। तत्र च "अग्नेस्त्रयो ज्यायांसो भ्रातर आसन्[1]" इत्यादिर्ब्राह्मणभागोऽनुकूलः। देवानां विग्रहाद्यभावेन[2] ग्रहणाद्यसम्भवात् त्यागमात्रं यजमानेन कर्तव्यम्। तावन्मात्रेणैव यागसिद्धिः। त्यक्तस्य हविषोऽग्नौ प्रक्षेपणं संस्कारमात्रम्। स च प्रक्षेपः प्रतिपत्तिकर्मेत्युच्यते। सोऽयं प्रक्षेपो द्विरवदानादिविशिष्टस्यैवेति ततोऽवशिष्टस्य हविष इडाचतुर्धाकरणादिभक्षणेन ऋत्विग्यजमानक्रियमाणेन संस्कार इति मीमांसकसरणिः। एवमेव होमस्थलेऽपि द्रष्टव्यम्। यागहोमयोर्याज्ञिकसमये किञ्चिद्धर्म-

---

१ अग्नेस्त्रयो ज्यायांसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमारिष्यतीति स निलायत सोऽपः प्राविशत्तं देवताः प्रैषमैच्छन् तं मत्स्यः प्राब्रवीत्तमशपद्धिया धिया त्वा वध्यासुर्यो मा प्रावोच इति तस्मान्मत्स्यं धिया धिया घ्नन्ति शप्तो हि तमन्वविन्दन् तमब्रुवन्नुप न आवर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात्तन्मे भ्रातृणां भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति परिधीन् परिदधाति रक्षसामपहत्यै॥ तै० सं० २. ६. ६. See also शत. ब्रा. १. २. १. १; and मै. सं. ३. ८. ६; "त्रयो वै पूर्वेऽग्नयः प्राधन्वन् हव्यं देवेभ्यो वहन्तः" इत्यादि।

२ शरीरं, हविर्ग्रहणं, फलप्रदानशक्तिः, तृप्तिः, फलदानमिति विग्रहादिपञ्चकम्।

CC.O Sampurnanand University Collection. Digitized by eGangotri

विधानार्थं व्यवहारे भेदकल्पनेऽपि न स्वरूपे भूयान् भेदः। उभयत्रापि हविस्सम्पादनहविस्त्यागप्रक्षेपभक्षणादीनां व्यापाराणां तुल्यत्वात्। दाने परं देवताभिस्सह न सम्बन्धो मीमांसकमते। गोहिरण्यादेर्ब्राह्मणादिसम्प्रदानकत्यागेनैव तन्निष्पत्तिः। तावतैव च तत्तत्फलप्राप्तिसिद्धिरिति तेषामाशयः। याज्ञिकमते तु दानादिना देवतातृप्तेरुदयात् साक्षाद्देवानामुद्देश्यत्वाभावेऽपि परम्परया तत्रापि सोऽस्त्येवेति।

मन्त्रभागकृत्यम्

एवं तत्तद्ब्राह्मणवाक्यैर्विभिन्नरूपतया विहितानां तत्तत्कर्मणामनुष्ठानकाले तत्तत्कर्मस्वरूपस्य, तदीयदेवातायाः, तन्निष्ठस्योच्चावचस्य गुणराशेः, तदीयद्रव्यस्य तत्सम्बन्धिनः पदार्थजातस्य वा स्मरणमवश्यकर्तव्यं भवति कीर्तनं वा। तत् कार्यं निर्वर्तयति मन्त्राख्यं भागान्तरमस्य। अत एव प्रथमं विहितेष्वेव कर्मसु अनन्तरं तदीयद्रव्यदेवतास्वरूपगुणकीर्तनादावुपयोगान्मन्त्राणां ब्राह्मणभागोपजीवकत्वमेव। 'सति हि कुड्ये चित्ररचना' इति न्यायात्। अत एव मीमांसकमते ब्राह्मणभागस्यैव सर्वापेक्षया प्राधान्यम्। मन्त्रभागस्य ततो दुर्बलत्वमेव। अत एव च कारणात् विशेषतो विधिभागमवलम्ब्यैव बहुलतरं प्रवर्तते मीमांसाशास्त्रमिति नात्र तिरोहितमिवास्ति।

उपासनाकाण्डविषयः

एवमुपासनाकाण्डमपि तत्तद्देवतोपासनादिविधायकं विधिभागैकदेश एव। यागहोमादिषु शारीरो व्यापारः द्रव्यादिसाधनं चेत्यादि बह्वपेक्षितमस्ति बाह्यं वस्तु। उपासनायां तु न तथा। तत्रान्तरिककल्पनामात्रमपेक्षितम्। तच्च तत्तत्पदार्थज्ञानमात्रेणैव सम्पत्स्यत इति न तत्र बाह्यवस्तुसत्तापेक्षा इतीयानेव भेदः कर्म-

CC.O Sampurnanand University Collection. Digitized by eGangotri

काण्डोपासनाकाण्डयोः। नैतावता विधित्वं व्याहन्यते। एवञ्च कर्मोपासनाकाण्डाभ्यां बाह्याभ्यन्तरसाधनकं देवतोपासनमेव साक्षात्परम्परया वा विधीयत इत्यवसीयते। अत एव यजेर्देवपूजार्थत्वं स्मरन्ति पाणिनीयाः 'यज देवपूजा' इत्यादिना। परं यागस्य देवतोद्देश्यकद्रव्यत्यागात्मकत्वमभ्युपगच्छन्तोऽपि न देवताराधनारूपत्वमभ्युपगच्छन्ति मीमांसकाः। तथात्वे हि लोके पूजायाः पूज्यमानप्रधानकत्वदर्शनात् यागस्यापि तथात्वापत्तौ तस्यानियतकर्तव्यत्वमिव कदाचिदकर्तव्यताप्यापद्येत। तदनिष्टं नित्यनैमित्तिकेषु कर्मसु। अतस्तत्परिहाराय कर्मण एव प्राधान्यमभ्युपगन्तव्यम्। देवता तु तत्राङ्गभूतैव कर्मनिष्पत्तावुपकरोति द्रव्यवत्। तत्रापि द्रव्यस्यैव सन्निहिताङ्गत्वम्, देवतायास्तु व्यवहिताङ्गत्वमेवेत्याशयस्तेषाम्। अस्तु यथा तथा वा।

कर्मणां चातुर्विध्यम्

तानि च श्रौतानि कर्माणि चतुर्धा विभक्तानि—होमाः, इष्टयः, पशुयागाः, सोमयागाश्चेति। तत्र सायंप्रातरनुदिनमाहिताग्निनानुष्ठीयमानोऽग्निहोत्रसंज्ञकः कर्मविशेषोऽन्ये च तादृशा होमाः। एवं प्रत्यमावास्यं प्रतिपूर्णिमं च यागविशेषा ओषधिप्रभवैरेव चरुपुरोडाशादिभिर्द्रव्यैः क्रियमाणा अन्ये च तत्सदृशा इष्टिपदवाच्याः। एतेषां सत्यपि यागत्वेऽल्पकालसाध्यत्वेनाल्पत्वादिष्टिपदवाच्यत्वम्। अजादीनां पशूनां मांसैः क्रियमाणा यागाः पशुयागाः। सोमाख्यां लतामानीय तां निष्पीड्य ततो निस्सृतेन रसेन क्रियमाणा यागास्सोमयागा इत्युच्यन्ते। ते च प्रत्येकं परश्शतसंख्याकास्तत्तच्छेदेषु विहिताः।

तेषां प्रकृतिविकृतिभावः

एवं वेदेऽनेकसंख्याकानां कर्मणां सत्यपि विधौ न प्रत्येककर्मसन्निधौ तदपेक्षितयावदङ्गकलापविधिरस्ति। किन्तु एकस्यैव कस्य

CC.O Sampurnanand University Collection. Digitized by eGangotri

चिन्मूलभूतस्य सन्निधौ तदपेक्षितनिखिलाङ्गकलाप आम्नातः। इतरेषु तु विशेषाङ्गानामेव विधानम्। सामान्याङ्गानां तु पूर्वत एवानयनम्। यथा दर्शपूर्णमासयागप्रकरणे तदपेक्षितनिखिलाङ्गोपदेशस्समस्ति। तदितरेषु तु सौर्यादिषु तेषामङ्गानामपेक्षितत्वेऽपि न पुनः पाठः। किन्तु केषाञ्चन विशेषाङ्गानामेव। सामान्यानि तु दर्शपूर्णमासत एवागमयितव्यानि। अस्यैव चातिदेश इति व्यवहारो मीमांसाशास्त्रे। यस्य च सन्निधौ स्वापेक्षितनिखिलाङ्गोपदेशोऽस्ति तत् कर्म प्रकृतिरित्युच्यते। यत्र तु न तथा, किन्तु अन्यत एवाङ्गान्यागमयितव्यानि भवन्ति, सा विकृतिः। तत्र सामान्येन व्रीहियवाद्यौषधद्रव्यकाणामिष्टीनां तादृशीषु इष्टिषु, पशुद्रव्यकाणां पशुयागेषु, सोमद्रव्यकाणां च सोमयागेष्वतिदेशः।

यागीयहवींषि

एवं स्वरूपतस्संख्यया च बहुप्रभेदभिन्नेषु यागहोमादिषु श्रौतेषु कर्मसु तत्तद्देवताप्रदानार्थं यान्युपयुज्यन्ते द्रव्याणि तानि यथायथं सङ्गृह्यन्ते। तत्र द्रव्यभेदमात्रं प्रतिपिपादयिषुभिरस्माभिरेकं द्रव्यं कर्मभेदेन पुनःपुनरनेकत्र श्रूयमाणमपि कञ्चित्कर्मविशेषमाश्रित्य सकृदेव प्रदर्श्यते, न तु पुनःपुनः। प्रियपाठकानामक्लेशबोधार्थं च तानि पट्टिकारूपेण प्रदर्श्यन्ते—

औषधद्रव्याणि

हवींषि, हविषां द्रव्याणि वा	यागनाम	स्थलम्
दधि	अग्निहोत्रम्	तै. ब्रा. २. १. ५.
पयः	,,	,,
यवागूः	,,	,,
तण्डुलाः	चित्रेष्टिः	मै. सं. २. ३. ६.

CC.O Sampurnanand University Collection. Digitized by eGangotri

हवींषि, हविषां द्रव्याणि वा		यागनाम	स्थलम्
व्रीहयः यवाः	पुरोडाशः (पिष्टपिण्डरूपः)	दर्शपूर्णमासयागः	तै. सं. २. ५. २.
आज्यम्		उपांशुयाजः	तै. ब्रा. ३. ३. ४.
पिष्टम्		पौष्णयागः	मै. सं. २. १. ४.
शुक्ला व्रीहयः		सोमारौद्रेष्टिः	,, २. १. ५.
कृष्णा व्रीहयः		,,	,, २. १. ६.
प्रियङ्गवः		मारुतेष्टिः	,, २. १. ८.
कृष्णलाः	(सुवर्णमाषाः)	प्राजापत्येष्टिः	,, २. २. २.
गर्मुत्	(तृणविशेषः)	बार्हस्पत्येष्टिः	,, २. २. ४.
वा(स्तु)स्त्वम्	(शाकविशेषः)	रौद्रेष्टिः	,, ,,
सतीनाः	(कलायाः)	वसुमदिष्टिः	,, २. २. ६.
पयस्या	(आमिक्षा)	मैत्रावरुणी	,, २. ३. १.
मधु		ऐन्द्राग्नयागः	,, २. ३. ६.
धानाः		चित्रेष्टिः	,, ,,
उदकम्		,,	,, ,,
करीराणि	(खर्जूराङ्कुराणि, तत्फलानि वा	कारीरीष्टिः	तै. सं. २. ४. ९.
लाजाः		अश्वमेधे सप्तान्नहोमः	तै. ब्रा ३. ८. १४.
श्यामाकाः		सोमेन्द्रेष्टिः	तै. सं. २. ३. २.
नीवाराः		बार्हस्पत्येष्टिः	तै. सं. १. ८. १०
सुरा *		सौत्रामणी	तै. ब्रा. १. ८. ५.
अपामार्गः		राजसूयेऽपामार्गहोमः	तै. ब्रा. १. ७. १.
गवीधुकः (अरण्यगोधूमः)		रौद्रेष्टिः	,, १. ७. ३
आशुव्रीहयः	(षाष्टिकाः)	सावित्रेष्टिः	तै. सं. १. ८. १०.

* सुराद्रव्यकयागस्य कलौ निषिद्धत्वान्नानुष्ठानम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

हवींषि, हविषां द्रव्याणि वा		यागनाम	स्थलम्		
आस्वाः	(धान्यविशेषाः)	मित्रेष्टिः	तै. सं.	१. ८.	१०.
करम्भः	(दधिमिश्रिता-स्सक्तवः)	अश्वमेधे सप्तान्न-होमः	तै. ब्रा.	३. ८.	१४.
पृथुकाः	(चिपिटकाः)	„	„		„
सक्तवः		„	„		„
मसूस्याः	(मसूरा यैर्द्विदलानि क्रियन्ते)	„	„		„
प्रियङ्गुतण्डुलाः		„	„		„
वाजिनम्		वाजिनयागः	„	१. ८.	३.

पशुद्रव्याणि

अजः		वायव्ययागः	मै. सं.	२. ५.	१.
अविः		„	„	२. ५.	२.
वशा	(वन्ध्या)	आदित्ययागः	„		„
मेषी		सारस्वतयागः	„		„
गर्भिणी अविः		वासन्तः	„		„
ऋषभः		ऐन्द्रः	„	२. ५.	३.
कुभ्रः		„	„		„
पुनरुत्सृष्टः	(गलितवृषणः पुङ्गवः छाग इति भरद्वाजः)	सावित्रयागः	„	२. ५.	४.
वेहत्	(गर्भघातिनी)		„		„
धेनुः*	(गौर्दोग्ध्री)	द्यावापृथिव्यः	„		„
वत्सः		वायव्यः	„		„

* अत्र धेन्वृषभयोर्हविष्ट्वेन विधानेऽपि कलिवर्ज्यप्रकरणे गवालम्भस्य निषिद्धत्वात् न ताभ्यां यागकरणम् । शिष्टाचारोऽप्येवमेवाऽस्ति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

हवींषि, हवीषां द्रव्याणि वा		यागानाम	स्थलम्
सूतवशा	(सकृत्प्रसूता)	ऐन्द्रः	मै. सं. २. ५. ४
धेनुः पर्यारिणी*	(प्रसवकालमतीत्य कृतप्रसवा)	द्यावापृथिव्यः	,, ,,
नपुंसकः		सोमापौष्णः	,, २. ५. ५.
पेत्वः	(गलितरेतस्को मेषः)	वारुणः	,, २. ५. ६.
पृश्निः	(अल्पतनुः)	आग्निमारुतः	,, २. ५. ७.
वृष्णिः	(मेषविशेषः)	ऐन्द्रः	,, २. ५. ११.
मल्हा	(कण्ठावलम्बित-स्तनयुग्मा)	आदित्यः	तै. सं. २. १. २.
वडवः	(यः पुमांसं सन्त-मारोहति वडबा-मिव स वडवः)	त्वाष्ट्रः	,, २. १. ८.

अश्वमेधे ग्राम्याः पशवः

हवींषि हविर्द्रव्याणि वा		देवतानाम	स्थलम्
अश्वः		प्रजापतये	मा. सं. २४. १.
तूपरः	(शृङ्गरहितः पशुः)	,,	,,
गोमृगः	(गवि मृगेण गोर्मृग्यां वोत्पादितो गोमृग इति सायणः। गवय इत्यन्ये)	,,	,,
वत्सतरी		धात्रे	,, २४. ५.
बष्किहाः	(चिरप्रसूताः)	मरुद्भ्यः	,, ,, १६.
कर्णाः	(पशुविशेषाः)	यमाय	,, २४. ३.
लीहाकर्णः	(रागयुक्तकर्णः)	त्वष्ट्रे	,, २४. ४.

CC.O Sampurnanand University Collection. Digitized by eGangotri

हवींषि हविर्द्रव्याणि वा		देवतानाम	स्थलम्
शुण्ठः	(अवेष्टितकर्णः)	विष्णवे	तै. सं. ५. ६. १७.
अधीलोधकर्णः	(कर्णोपरि प्ररूढ़-कर्ण इति माधवः)	,,	,, ,,
लप्सुदिनः	(लम्बमानपुच्छः)	,,	,, ,,
किकिदीविः	(तित्तिरिः)	त्वष्ट्रे	,, ५. ६. २२.
विदीगयः	(कुक्कुटविशेषः)	,,	,, ,,
वडवा *		दिग्भ्यः	,, ५. ६. २१.
पुरुषी *	(मनुष्यस्त्री)	विराजे	,, ,,
मालङ्गाः	महाकायाः	द्यावापृथिवीभ्यां	,, ,, ,, १९.

अश्वमेधे आरण्याः पशवः

आरण्याः पशवः प्रायेणाश्वमेध एव समाम्नाताः। ते चात्र विस्तरभयात्तत्तद्देवतानिर्देशमन्तरेणैव संगृह्यन्ते।

कपिञ्जलः	क्रुञ्चः (क्रौञ्चः)
कलविङ्कः	मद्गुः (जलकाकः)
तित्तिरिः	चक्रवाकः
वर्तिका	कुक्कुटः
ककरः	उलूकः
विककरः	चाषः
शिशुमारः	मयूरः
मण्डूकः	कपोतः
मत्स्यः	लवः
हंसः	कौलीकः
बलाका	गोषादी

---

* अनयोरुत्सर्ग एव, न संज्ञपनादि।

CC.O Sampurnanand University Collection. Digitized by eGangotri

कुलीका
पारुष्णः
परावतः (कपोतविशेषः)
सीचापूः
जतुः
कालकण्ठकः
सुपर्णः
शुकः
आखुः
पाङ्क्तः (पक्षिविशेष इति माधवः, यूपकजातिविशेष इति महीधरः)
काशाः
नकुलः
बभ्रुकः
ऋश्यः
कुलुङ्गः
परस्वान्
महिषः
उष्ट्रः
अरण्यमेषः
मर्कटः
क्रिमिः (गोमयपिण्डकारी)
किन्नरः (मयुः, अरण्यमयूरो वा)
ऊलः (काक इति माधवः)
हलीक्ष्णः (हरितचटकः)

वृषदंशः (मार्जारः)
कङ्कः (बकः)
धुङ्क्ष्वा (श्वेतकाकी)
पुष्करसादिः (कमलभक्षी पक्षिविशेष इति महीधरः, भ्रमर इति सायणः)
शार्गः (अरण्यचटकः)
सृजयः
शयण्डकः
शारिः
श्वावित् (शल्ली)
शार्दूलः
वृकः (अरण्यश्वा)
सर्पः
आतिः (कुरङ्गी)
वाहसः (पृष्ठे क्षुल्लशंखवाही जन्तुः)
दार्वाघाटः (द्रुमकुट्टकः)
पैङ्गराजः (भारद्वाजः)
अलजः (भासः)
प्लवः
पुरुषमृगः
गोधा
कालका (सरटा)
दार्विदा (द्रुमकुक्कुटः)
लोपाशः
भल्लकः

CC.O Sampurnanand University Collection. Digitized by eGangotri

सुषिलीका	गजः
जहका (बिलवासी क्रोष्टा)	सिंहः
कोकिलः	कृकलासः
उद्रः (जलबिडालः)	पिपका
कच्छपः	पृषतः
कुण्डृणाची (गृहगोधिका)	शरभः
गोलत्तिका (खञ्जरीटा)	मक्षिका (दीर्घकर्णो मृगविशेषः)
भेकी (मण्डूकस्त्री)	मकरः
कशः	नक्रः
मान्थलः	कुलीकयः (बहुपात् मत्स्यविशेषः)
अजगरः	कुषीतकः (समुद्रकाकः)
शशः	सृजया(शुक्लसर्पः,नीलमहिषो वा)
रुरुः	स्वजः (सर्पविशेषः)
क्वयिः	सृमरः (चमरः)
कलकण्ठः	शित्पुटः (मार्जारसदृशो जातिविशेषः)
खङ्गः	
कृष्णः श्वा	मान्थीलवः (जलकुक्कुटः)
गर्दभः	लोपा (श्मशानशकुनिः)
तरक्षुः (गर्दभाकारो व्याघ्रः)	कीर्शा (कुलाली शकुनिका)
सूकरः	वार्ध्राणसः (खङ्गमृगः)

अत्र प्राधान्येन विभिन्नजातयः, समानजातयोऽपि केचन विरूपविकलाङ्गाश्च पशवो निर्दिष्टाः। न पुनर्यावन्त्येदभिन्नाः सर्वेऽपि सजातीयाः। अतश्च साकल्येन सङ्कलनया संख्यायामिमे पशवः वस्तुत इतोऽधिका एव भवन्ति।

आश्वमेधिकानां सर्वेषां पशूनां संख्या पाठकगणविनोदायाधो निर्दिश्यते—तत्र सुत्यात्रयम्। अर्थाद्दिनत्रये सोमयागाः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रथमसुत्याग्निष्टोमसंस्थाका । द्वितीयोक्थ्यसंस्थाका । तृतीया चातिरात्रसंस्थाका । तत्र प्रथमसुत्यायामेक आग्नेयः पशुः । द्वितीयसुत्यायामेव विशेषः । स चेत्थम्—

तैत्तिरीयश्रुत्यनुरोधेन		माध्यन्दिनश्रुत्यनुरोधेन	
ग्राम्याः पशवः		ग्राम्याः पशवः	
(१) अश्वतूपरगोमृगाः	३	(१) अश्वतूपरगवयाः	३
(२) पर्यङ्ग्याः*	११	(२) पर्यङ्ग्याः	१२
(३) रोहितादयः		(३) रोहितादयः	१८६
(अष्टादशिनः)	१८०		
(४) चातुर्मास्यपशवः	१३५	(४) चातुर्मास्यपशवः	१२६
(५) द्वन्द्विनः	२२	(५) एकादशिनः	२२
(६) एकादशिनः	२२		
आरण्याः		आरण्याः	
(७) सूकरादयः (दशिनः)	१११	(६) कपिञ्जलादयः	२६०
मिलित्वा	४८४	मिलित्वा	६०९

आपस्तम्बश्रौतसूत्रानुसारेण

ग्राम्याः पशवः	
)१) अश्वतूपरगवयाः	३
(२) पर्यङ्ग्याः	१३
(३) रोहितादयः	१८०
(४) चातुर्मास्यपशवः	१३५
(५) द्वन्द्विनः	२२
(६) एकादशिनः	२२
(७) ऋतुपशवः	१८
(८) पञ्चदशिनः	१५
आरण्याः	
(९) सूकरादयः	१११
मिलित्वा	५१९

CC.O Sampurnanand University Collection. Digitized by eGangotri

तथा च—

षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि ।
अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि च ॥

इति माध्यन्दिनसंहिताभाष्ये (मा. सं. भा. २४. ४०) महीधरस्सङ्ग्राह ।

"सर्वे पञ्चशती भवन्ति पशवोऽथैकोनिता विंशतिः" इति आपस्तम्बश्रौतसूत्रानुसारी भट्टभास्करो ज्ञानयज्ञे (वेदभाष्ये) समगृह्णात् । अत्र तैत्तिरीयशाखायामनुक्ताः (३३) त्रयस्त्रिंशत्पशवः शाखान्तरात् गृहीता आपस्तम्बेन । अत एव श्रुत्यपेक्षया सूत्रे पशुसंख्याधिक्यमिति वेदितव्यम् ।

एवञ्चाश्वमेधे पशुषु प्रकारद्वयमस्ति—ग्राम्या आरण्याश्चेति । अश्वादयो ग्राम्याः, सूकरादय आरण्याः । अत्रैकविंशतिर्यूपाः । यूपेषु ग्राम्याः पशवो बन्धनीयाः । आरण्यपशवो न यूपे बध्यन्ते । किन्तु एतान् पशून् तत्तज्जालवागुरादिभिः (येन येन ये ग्रहीतुं शक्यन्ते तेन तेन) गृहीत्वा ग्राम्यपशूनां नियोजनकाले यूपान्तराले यजमानपुरुषा धारयेयुः । पर्यग्निकरणान्तेऽङ्गकलापे कृते एतान् तथैव उत्सृजेयुः । जीवतां तथैव त्यागः, न विशसनादिकं कार्यमिति मौलिकविधेः स्वरूपम् । परमश्वमेधस्यापि कलौ निषिद्धत्वेन गवालम्भवदस्याप्यनुष्ठानं न भवितुमर्हतीति सर्वथा लोप एव । अतोऽयमपि यागः "श्रुतौ तस्करता स्थिता" इत्येव न्यायमनुसरति ।

तृतीयमहस्तु अतिरात्रसंस्थाकम् । तत्र दिने सुत्याकाले आलब्धव्याः क्रतुपशवश्चत्वारः, अतिरिक्ताः षड्विंशतिः, इत्याहत्याश्वमेधे माध्यन्दिनसंहितानुसारेण चत्वारिंशदुत्तरा षट्शती (६४०), तैत्तिरीयशाखानुसारेण पञ्चदशाधिका पञ्चशती (५१५), आपस्तम्बानुसारेणात्राष्टाविंशतिः, पूर्वं विंशत्युत्तराणि पञ्चशतानि,

CC.O Sampurnanand University Collection. Digitized by eGangotri

मिलित्वाष्टाचत्वारिंशदुत्तराणि पञ्चशतानि (५४८) पशव इत्यवगन्तव्यम् ॥

सोमयागे द्रव्यम् ।

एवमग्निष्टोमादिषु सहस्रसंवत्सरान्तेषु एकाहनिकायिसत्राहीनादिबहुप्रभेदभिन्नेषु सोमयागेषु सोमलता प्रधानं द्रव्यम् । ताश्च गवादिभिः ब्राह्मणोक्तैर्दशभिर्द्रव्यैः [1]क्रीत्वाऽभिषुत्य ततो निष्पन्नेन रसेन यागः कर्तव्यः । इदानीं सोमलताया अलाभेन तत्स्थाने पूतीकाख्यां सोमलतासदृशीं लतामानीय, तत्र सोमलतायां विहितान् सर्वानपि व्यापारान् कृत्वा यागः क्रियते अवशिष्टश्च रसः ऋत्विग्भिर्यजमानेन च पीयते । एवं प्रायशो वेदोक्तानि श्रौतकर्मोपयुक्तानि द्रव्याणि संगृहीतानि । इति शम् ॥

---

१ सोमलता स्वयमाहर्तुं शक्यापि न तथाऽऽनेतव्या, किन्तु श्रुत्युक्तेन मार्गेणान्यस्मात्पुरुषादेव क्रेतव्या ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

AGRICULTURE IN THE VEDAS.

By

Pt. S. N. Jharkhandi, M. A.,

Librarian, Govt. Sanskrit College, Benares.

Historical research has not yet been able to settle beyond dispute the early home of the Vedic Aryans, nor the time when they first debouched into the northern well-watered and wooded plains of Hindostan. A cursory glance at the Ṛgveda, the earliest literature of this remarkable people, already reveals the fact that, by the time these hymns were composed, they were no mere nomads without settled habitations or occupations. Frequent references to agriculture and animal husbandry, implements of cultivation and industry abound in its sacred verses and the general impression created is that of a people who had settled in villages and even in fortified towns[1] with their chiefs or kings and other organs of administration, and who, under competent leadership, could lead

---

1. Śambara is said to have lived in a town containing a hundred fortresses of stone—शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत् (Rv. IV. 32. 20). Surely the Aryans who conquered the Dasyus must have built their own fortresses. Iron forts or cities are also mentioned in Rv. VII. 3. 7; 15, 14:—पूर्भिरायसीभिः and so on.

CC.O Sampurnanand University Collection. Digitized by eGangotri

well-disciplined forces against each other or against the common enemy—the Dāsas or Dasyus. In this article we shall confine ourselves to find out how far Agriculture had progressed with the Aryans by quoting verses in which one or other operations relating to Agriculture are mentioned.

"The very name Ârya," says R. C. Dutt in his History of Civilisation in Ancient India (p. 35), "By which the Aryan Conquerors of India distinguished themselves from the aborigines is said to have come from a root which means 'to cultivate'. Prof. Max-müller has tried to trace the progress of the word all over the Aryan world from Iran or Persia to Erin or Ireland and argues with considerable force that the word was invented in the primeval home of the Aryans in Central Asia to indicate their partiality to cultivation. It has indeed been admitted on all hands that the cultivation of the soil was known to the Indo-Aryans before they separated themselves from their Iranian brethren as is indicated by the identity of expressions Yavam, Kṛṣ and S'asya in the Ṛgveda with Yao, Karesh and hahya in Avesta referring to the ploughing in of seeds and to the grain which resulted."

The most remarkable hymn in which agriculture and its processes are mentioned is Hymn 57 of B. IV of

CC.O Sampurnanand University Collection. Digitized by eGangotri

the Ṛgveda. It is addressed to Kṣetrapāla or the Lord of the field. According to the instructions contained in the Gṛhya Sūtras, the hymn was to be silently repeated at the commencement of ploughing:

क्षेत्रकर्षणे अनेन सूक्तेन प्रत्यृचं जुहुयाज्जपेद्वा ।

Ploughing was done by means of oxen as is still done in India after thousands of years. The operation was considered a sacred one and the Aryan cultivator entered into the task with an exhileration of spirits which is probably foreign to the debt-laden, half-starved peasant of today. The hymn itself would find an echo in the heart of every cultivator even in this age of rationality and sophistication.

शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम् ।
शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिङ्गय ॥

Happily work our steers and men ; may the plough furrow happily. Happily be the traces bound, happily may he ply the goad.*

शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः ।
तेनेमामुप सिञ्चतम् ।

S'una and Sīra, welcome ye this laud, and with the milk which ye have made in heaven, Bedew ye both this earth of ours.

अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगासस्ति यथा नः सुफलासस्ति ॥

* The translation is by Griffith.

CC.O Sampurnanand University Collection. Digitized by eGangotri

Auspicious Sītā, come thou near: we venerate and worship thee that thou mayst bless and prosper us and bring us fruits abundantly.

(Here Sita stands for furrow or husbandry personified and addressed as a deity).

इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ।

May Indra press the furrow down, may Pūshan guide its course aright.
May she, as rich in milk, be drained for us through each succeeding year.

शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ॥

Happily let the shares turn up the plough-land, happily go the ploughers with the oxen.
With meath and milk Parjanya make us happy. Grant us prosperity S'una and Sīra.

The Vedic cultivator thus entered into his task with thankfulness and gladness of heart, the operation performed being in his eyes a sacred one, for the successful conclusion of which the blessings of his gods were necessary. The handling of the plough was not, thus, considered derogatory as it was regarded by the higher castes in later ages.

In the famous Ṛgvedic hymn known as the gambler's wail, (Ṛg. X. 34,13), the Ṛṣi earnestly asks

CC.O Sampurnanand University Collection. Digitized by eGangotri

us not to play with dice, but to cultivate the corn and enjoy the gain and deem that wealth sufficient :—

अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः ।

because तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥

There are thy cattle, there thy wife, O gambler, so this good Savitar himself hath told me.

Apart from these Sūktas, agricultural similes are interspersed throughout the Ṛgveda, showing that agriculture and animal husbandry were important occupations, nay, apart from war and sacrificing, the only other important occupation of the Vedic householder. A few instances will suffice. In Bk. VIII, Hymn XXII, Áśvins are said to have, with their plough, ploughed the first harvest of the sky :

दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।

In Bk. I, Hymu CXXIII, Pûshan is asked to bring the six seasons 'as one who ploughs with the steers brings corn.'

उतो स मह्यमिन्दुभिः षड्युक्तां अनुसेषिधत् । गोभिर्यवं न चर्कृषत् ।

In Book I, Hymn CXVII, Āswins are said to plough and sow barley : यवं वृकेणाश्विना वपन्ता ।

It is needless to multiply instances. Suffice it to say that sowing and reaping are mentioned in Hymn 94, Book X, threshing is mentioned in Hymn 48 and winnowing in Hymn 27 of the same book, threshing and winnowing are mentioned in Book IV,

CC.O Sampurnanand University Collection. Digitized by eGangotri

garnering in Book I, while barley or grain in general is mentioned in Book I.

In the Vājasaneyi Saṃhitā of the Yajurveda, similarly, we find processes of agriculture mentioned with appropriate Mantras.

सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया ॥
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमेयात् ।
शुनं सुफाला विकृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्त्तनास्मे ।
(XII. 67—69)

In the above कवयः are interpreted by उव्वट as कृषिकर्माभिज्ञाः or experts in Agriculture.

In the famous चमक chapter of the same Saṃhitā, we find mention of various grains still largely grown in India :—

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ।

As may be expected, the Atharva Veda contains a number of references to the art of agriculture and animal-husbandry. Hymn 17 of Book III, which is a slight variation or adaptation of the Yajus Mantras, quoted above, is used for success in ploughing.

A few verses with Whitney's translation are reproduced below :

CC.O Sampurnanand University Collection. Digitized by eGangotri

सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नयौ ।

The poets (Agriculturists ?) harness the ploughs, they extend severally the yokes—they the wise ones, with desire of favour toward the gods.

युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम् ।
विराजः श्नुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्कमा यवन् ॥

Harness ye the ploughs, extend the yokes; scatter the seed here in the prepared womb; may the bunch of Virāj be burdened for us; may the sickles draw in the ripe (grain) yet closer.

लाङ्गलं पवीरवत् सुशीमं सोमसत्सरु ।
उदिद् वपतु गामविं प्रस्थावद् रथवाहनं पीवरीं च प्रफर्व्यम्

Let the plough, lance-pointed, well-lying, with well-smoothed handle, turn-up (ud-vap) cow, sheep, an on-going chariot-frame and a plump wench.

Note—This apparently means that all the good things mentioned above come forth as the reward of successful agriculture.

इन्द्रः सीतां नि गृह्णातु तां पूषाभि रक्षतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥

Let Indra hold down the furrow; let Pûshan defend it; let it, rich in milk, yield to us each further summer.

Hymn 11 of Book IV A. V. is in praise of the draft oxen. So imprssed is the Ṛṣi with the importance of these humble creatures, who are still the main props of agriculture in India, that he praises them as the

CC.O Sampurnanand University Collection. Digitized by eGangotri

sustainers of the earth and sky. Let us hear the Ṛṣi in his own words.

अनड्वान् दाधार पृथिवीमुत द्यामनड्वान् दाधारोर्वन्तरिक्षम् ।
अनड्वान् दाधार प्रदिशः षडुर्वीरनड्वान् विश्वं भुवनमा विवेश ॥

Whitney's translation :

The draft-ox sustains earth and sky ; the draft-ox sustains the wide atmosphere ; the draft-ox sustains the six wide directions ; the draft-ox hath entered into all existence.

अनड्वानिन्द्रः स पशुभ्यो वि चष्टे त्रयाञ्छक्रो वि मिमीते अध्वनः ।
भूतं भविष्यद् भुवना दुहानः सर्वा देवानां चरति व्रतानि ॥

The draft-ox is Indra ; he looks out from the cattle; triple ways the mighty one measures out; yielding the past, the future, existing things, he goes upon all the courses of the gods.

इन्द्रो जातो मनुष्येष्वन्तर्घर्मस्तप्तश्चरति शोशुचानः ।
सुप्रजाः सन्त्स उदारे न सर्षद् यो नाश्नीयादनडुहो विजानन् ॥

Born an Indra among human beings ; he, goes about shining brightly, a heated hot-drink, he, being one of good offspring, shall not go in mist, who understanding it, shall not partake of the draft-ox, And so on.

Hymn 21 of Bk. IV is again in praise of the kine, who formed the chief wealth of the Vedic house-holder. Here are some of the verses by the Vedic seer.

CC.O Sampurnanand University Collection. Digitized by eGangotri

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥

The kine have come, and have done what is excellent; let them stay in the stall; let them take pleasure with us; may they be rich in progeny here, many-formed, milking for Indra many dawns.

इन्द्रो यज्वने गृणते च शिक्षत उपेद्दु ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ॥

To the sacrificer and singer, the helpful one, Indra verily gives further, steals not what is his; increasing more and more the wealth of him, he sets the godly man in an undivided domain.

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवांश्च याभिर्यजते ददाति च ज्योगित् ताभिः सचते गोपतिः सह ॥

They shall not be lost; no thief shall harm them; no hostile (person) shall dare attack their track With whom he both sacrifices to the gods and gives, long verily with them does the kine-god go in company.

न ता अर्वा रेणुककाटोश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥

No dust-raising horseman reaches them; not unto the slaughter-house do they go; these kine of that sacrificing mortal roam over wide-going fearlessness.

The regular sacrificer, therefore, kept a well-filled stall of cows, who were, under the laws of the Aryan

१६

CC.O Sampurnanand University Collection. Digitized by eGangotri

tribes, inviolable. In the inter-tribal warfare, which must have been of frequent occurrence in these far off days, the cows of the sacrificing Brahman were probably spared.

Agriculture had to depend upon irrigation in those days, as it has to depend even now. In fact, in a country like India, water-storage is and was absolutely necessary. The Vedas contain many references to irrigation wells, water for irrigation, irrigation of fields by means of canals, cultivators irrigating their fields and digging the canal for forward course. In the Atharva-Veda, we come across such references. In Stanza 7, Hymn 13 of Book III we have the practical part of the ceremony of cutting a water-channel. The canal has been cut and the water has to be admitted. The Ṛsi says :—

इदं व आपो हृदयमयं वत्स ऋतावरीः ।
इहेत्थमेत शक्वरीर्यत्रेदं वेशयामि वः ॥

Here, O ye waters, is your heart, Here is your calf, ye holy ones.

Flow here, just here, O mighty streams, whither I am leading you.

Pasturage is also a very important item of wealth among an agricultural people. Though allusions to it are but rare yet there are strong indications that great importance was attached to

CC.O Sampurnanand University Collection. Digitized by eGangotri

tt by the Vedic Aryans, as their greatest wealth consisted of large herds of cattle. Hymn 19, Book IV of the Ṛgveda is a hymn addressed to the cows, who are asked not to go farther on their way. Agni and Soma are then invoked to make them return to the owner with the herdsman, who knows well their approach, their parting and home-return and who watches their approach and rest.

Enough has now been said to indicate that the Vedic Aryan was an enthusiastic agriculturist and cattle-owner, who 'milked' the earth for the sustenance of himself and his family and who rejoiced in the possession of large herds of cattle, which provided him with milk and its products, with which he propitiated his gods and manes. Indeed his view of a happy mundane existence, as summarised in the Vedic blessing, consisted of being endowed by the grace of the gods with

धनं धान्यं पशुं वहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः—
wealth and corn and animals, many sons and a long life of a hundred years.

———

CC.O Sampurnanand University Collection. Digitized by eGangotri

AN ENQUIRY INTO THE NATURE OF SPEECH.

वाक्तत्त्वविमर्शः ।

निबन्धकः—हाराणचन्द्रभट्टाचार्य्यः

(काशीस्थराजकीयसंस्कृतमहाविद्यालयभूतपूर्वाध्यापकः
कलकत्तास्थराजकीयसंस्कृतमहाविद्यालयसाम्प्रतिकाध्यापकश्च ।)

भारतीयदार्शनिकविबुधेषु वैयाकरणाः प्रत्यभिज्ञासिद्धान्तानुगामिनः शाक्ताश्च वाक्तत्त्वविचारणायां कृतप्रयत्नाः परिलक्ष्यन्ते । नचैतेषां सर्वत्र संप्रतिपत्तिरस्ति, क्वचिद्विमतिरपि दृश्यमानाऽपह्नोतुं न शक्यते । तेषु तावत्सकलवैयाकरणवरेण्यस्य भगवतो भर्तृहरेः सिद्धान्तः प्रथमतो विशदीकृत्य दर्श्यते :—

भर्त्तृहरिणा खलु वाक्यपदीये व्याकरणशास्त्रप्रशंसावसरे वाचस्त्रैविध्ये स्वाभिमतिः सूचिता :—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥ (१)

(वाक्यपदीये ब्रह्मकाण्डे १४४)

समुपलभ्यमाने (२) हरिग्रन्थे नातोऽधिकमेतद्विषये दृश्यते ।

---

(१) एतद्=व्याकरणम् । अनेकतीर्थेति । श्लिष्टव्यक्तवर्णरूपा प्राप्तसाधुभावाऽपभ्रष्टा दुन्दुभिवेणुवीणादिशब्दरूपा चेत्यर्थं इति लघुमञ्जूषायां स्फोटप्रस्तावे एतत्पद्यव्याख्यानम् । "तत्र श्रोत्रविषया वैखरी । मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्त्या व्यवहारकारणम् । पश्यन्ती तु लोकव्यवहारातीता ।" भाष्यप्रदीपोद्द्योते १ आ० ।

(२) तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ।
क्रममाणः शनैः पारं तस्य यास्यामि पङ्गुवत् ॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

परन्तु काश्मीरकशैवाचार्य्याः प्रत्यभिज्ञामतमहागुरवः सोमानन्दनाथपादाः स्वरचितायां शिवदृष्टौ वैयाकरणमतोपन्यासावसरे पश्यन्त्या एव परावाग्रूपता वैयाकरणसिद्धान्तसम्मतेति प्रतिपादयामासुः—

"अथाऽस्माकं ज्ञानशक्तिर्या सदाशिवरूपता ।
वैयाकरणसाधूनां पश्यन्ती सा परा स्थितिः ॥
इत्याहुस्ते परं ब्रह्म यदनादि तथाऽक्षयम् ।
तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक् ॥"

(शिवदृष्टौ २।१-२)

व्याख्याता चेयं द्वितीयकारिका श्रीमतोत्पलदेवेन वृत्तौ,—
"यदनादि अनन्तं च परं ब्रह्म चिद्रूपं तदक्षरं निर्विकारं शब्दरूपम् । सैव पश्यन्तीसंज्ञा परा वाक् ।" इति

द्वितीयायामस्यां कारिकायाम्—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥"

इति वाक्यपदीयब्रह्मकाण्डस्था प्रथमा कारिकाऽर्थतः संगृहीता । तथा च पश्यन्त्या ब्रह्मरूपता परावाक्स्वरूपता च भगवतो भर्त्तृहरेः सम्मतेति शिवदृष्टिग्रन्थस्याशयः पर्य्यवसितः ।

इति महाभाष्यप्रदीपोपक्रमे कैयटपद्यदर्शनेन भर्त्तृहरिनिर्मिता महाभाष्यटीका पूर्वमासीद्, यामवलम्ब्य कैयटेन भाष्यव्याख्या विरचितेति प्रतीयते । सा च टीका वाक्यपदीयाद् भिन्ना खृष्टजन्मोत्तरवर्तिनि द्वादशशतके पादत्रयावशेषैवासीदिति तदानीन्तनेन वर्द्धमानेन स्वोपज्ञगणरत्नमहोदधिव्याख्याने भर्त्तृहरिपरिचयार्थमभिहितेन

"भर्त्तृहरिर्वाक्यपदीयप्रकीर्णकयोः कर्त्ता महाभाष्यत्रिपाद्या व्याख्याता च"

इत्यनेन वाक्येन निर्णीयते । अत्रोक्तं प्रकीर्णकं नाम वाक्यपदीयतृतीयकाण्डमधुनाऽपि सम्पूर्णं न मुद्रितम् । भर्त्तृहरिकृता महाभाष्यटीका कतिपयपत्रमात्रावशेषा जर्म्मान्देशीयबर्लिन्नगरस्थे पुस्तकालये वर्त्तत इति डा० कीलहर्नप्रकाशितमहाभाष्यद्वितीयभागभूमिकापर्य्यालोचनया ज्ञायते ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

अमुमेव वैयाकरणसिद्धान्तमाचार्य्यक्षेमेन्द्रः प्रत्यभिज्ञाहृदये संक्षेपेण संगृहीतवान् ;—

"शब्दब्रह्ममयं पश्यन्तीरूपमात्मतत्त्वमिति वैयाकरणाः" (१)।

(प्रत्यभिज्ञाहृदये ८ सू० १८ पृ०)

वाक्यपदीयब्रह्मकाण्डटीकायां पुण्यराजेन पूर्वोक्तस्य "वैखर्य्या मध्यमायाश्चे"त्यादि (१४४) पद्यस्य व्याख्याने पश्यन्त्याः परमसूक्ष्मता प्रत्यपादि ;—

"पश्यन्त्या रूपमनपभ्रंशमसङ्कीर्णं लोकव्यवहारातीतम्। तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन शब्दपूर्वेण योगेनाधिगम इत्येकेषामागमः।"

तत्रैव १४ तम(२)श्लोकव्याख्याने पुण्यराजः पश्यन्त्यपेक्षयाऽपि कांचित्परां प्रकृतिं न्यरूपयत् (३)।

यद्यपि भगवता भर्त्तृहरिणा पश्यन्त्यपेक्षया काचित्सूक्ष्मा वागवस्था नाभिहिता तथापि भर्त्तृहरेरधस्तने काले वैयाकरणसम्प्रदाये सिद्धान्तभेदः समजनीति पुण्यराजीयलेखद्वैविध्यदर्शनेनानुमीयते। तत्र "एकेषामागम" इति पुण्यराजसन्दर्भस्य मुख्यानां

---

(१) इत्थं पश्यन्त्या एवैकस्या ब्रह्मत्वजीवत्वे वैयाकरणसम्मते इति प्रतिपादनेन जीवब्रह्मणोरभेदवादितया वैयाकरणानामद्वैतवादपक्षपातित्वं प्रकटीकृतमिति मन्तव्यम्।

(२) तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥

वाक्यपदीय-ब्रह्मकाण्डे १४ श्लोकः

(३) "शब्दस्वरूपतत्त्वज्ञः क्रमसंहारेण योगं लभते; साधुप्रयोगाभिव्यक्तधर्म्मविशेषो महान्तं शब्दात्मानमभिसंभवं कैवल्यं प्राप्नोति, सोऽव्यतिकीर्णां वागवस्थां मध्यमाख्यामधिगम्य वाग्विकाराणां प्रकृतिं पश्यन्त्याख्यां प्रतिभामुपति, तस्माच्च सत्तामात्रात्प्रतिभाख्याच्छब्दात्पूर्वंयोगभावनाभ्यासात्प्रत्यस्तमितसर्वविकारोल्लेखां परां प्रकृतिं प्रतिपद्यते।" पुण्यराजकृता प्रकाशाख्यव्याख्या।

CC.O Sampurnanand University Collection. Digitized by eGangotri

सिद्धान्त इत्येवार्थः समुचितः; "एके मुख्यान्यकेवला" इति कोषे (१) एकशब्दस्य मुख्यवाचित्वाभिधानात्, आचार्य्यसोमानन्दपादैः क्षेमेन्द्रेण च वैयाकरणसमये पश्यन्त्या एव ब्रह्मरूपतेति प्रतिपादनाद्भर्त्तृहरेर्वैयाकरणपरमाचार्य्यस्य सिद्धान्तस्यैव तैः संग्रहौचित्यात्। इत्थं च सोमानन्दपादैः क्षेमेन्द्रेण च भर्त्तृहरिमतमेव संगृह्य प्रादर्शीति स्पष्टं सुधियाम्।

महाभाष्ये तु नैतद्विषये किञ्चिदपि सुस्पष्टं निरूपितं लभ्यते। भाष्यग्रन्थस्य शब्दानुशासनत्वेन शब्दसाधुत्वप्रदर्शनायैव तत्र विशेषतः श्रमो विहितः, दार्शनिकविषयास्तत्र प्रसङ्गागता एव विचारिताः, न च तत्र स्वातन्त्र्येण दार्शनिकविषयेषु विचारणा प्रवर्त्तिता। तस्माद् महाभाष्यकाराणां वाक्तत्त्वविषयेऽभिप्रायः कीदृश आसीदिति निश्चेतुं न शक्यते।

प्रत्यभिज्ञामतानुयायिनः काश्मीरकशैवाचार्य्याः परापश्यन्त्योर्नैकत्वमभ्युपगच्छन्ति। यद्यपि तेषां सिद्धान्ते वैखरीपर्य्यन्तास्ववस्थासु सर्वत्र परा वागनुस्यूता वर्त्तते, तथापि तास्ववस्थासु परा वागिति व्यपदेशास्पदता नाङ्गीक्रियते, किन्तु पश्यन्तीप्रभृतिसंज्ञान्तरैरेव तत्र व्यवहारः। एतेषां समये प्रकाशात्मनः परमशिवस्यानुग्रहमयी विमर्शशक्तिरेव परा वाक्, सैव च तस्य जगद्रूपेण प्रोन्मिमीलयिषावस्था (२), शक्तिशक्तिमतोरभेदेन (३) सा परा शक्तिः परम-

---

(१) अमरकोष-नानार्थवर्गे १८ श्लोकः।

(२) आचार्य्यश्रीमदभिनवगुप्तकृता परात्रिंशिका-प्रथमद्वितीयश्लोकव्याख्या; राजानकानन्दविरचितविवरणोपेतषट्त्रिंशत्तत्त्वसन्दोहप्रथमश्लोकः; क्षेमराजप्रणीता पराप्रवेशिका।

(३) शक्तिश्च शक्तिमद्रूपाद् व्यतिरेकं न वाञ्छति।
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव॥
अभिनवगुप्तनिर्म्मितबोधपञ्चदशिका ३।

CC.O Sampurnanand University Collection. Digitized by eGangotri

शिवात्परमेशितुर्वस्तुतो न भिद्यते; परमेश्वरस्येच्छाशक्तिरेवेयं ज्ञानशक्तिरूपतामापद्य पश्चात्क्रियाशक्तिरूपतां भजते। तत्र पश्यन्ती ज्ञानशक्तिमयी, मध्यमा तु क्रियाशक्तिमयीति निरूपितं श्रीमदभिनवगुप्तेन परात्रिंशिकाविवृतौ (१)। पश्यन्त्यवस्थायां वाच्यवाचकयोर्भेदो न भासते, अपि तु तयोरभेद एव प्रथते, मध्यमावस्थायां भासमानोऽपि तयोर्भेदः सहकृत्यैवाभेदं प्रतीतिपथमधिरोहतीति न तत्र भेदस्य स्फुटतयाऽवभासः, "वैखरी तदुभयभेदस्फुटतामय्येव" (२) इति तासां परस्परं विशेषोऽपि तत्र प्रपञ्चितः।

दृश्यते चात्र विषये महार्थमञ्जरीप्रणेतुर्महेश्वरानन्दस्य विमतिः। अभिनवगुप्तपदवीप्रस्थितेनापि तेन वैखरी मध्यमा पश्यन्ती सूक्ष्मा चेति वाचश्चतस्रो भिदाः प्रथमतः प्रदर्शिताः (३)। तन्मते क्रियाशक्तिरूपा वैखरी, मध्यमा ज्ञानशक्तिरूपा, पश्यन्ती तावदिच्छाशक्तिमयी, सूक्ष्मा च सर्वासामासां वाचामेकीभावरूपा विलक्षणावस्था। परा पुनर्वाक् परमेशितुः स्वरूप एवान्तर्निविष्टा। उक्तं तदेतत्तेन महार्थमञ्जरीविवरणे परिमले—

परा भगवती संवित्प्रसरन्ती स्वरूपतः।
परेच्छाशक्तिरित्युक्ता भैरवस्याविभेदिनी॥
अभिनवगुप्तकृता परात्रिंशिका-व्याख्या २ श्लोकः ६४ पृ०।

(१) पश्यन्त्यां यत्र भेदांशस्यासूत्रणम्, यत्र च मध्यमायां भेदावभासः, तत्र उभयत्र ज्ञानक्रियाशक्तिमये रूपे—१ श्लो० ६ पृ०।

(२) परात्रिंशिकाव्याख्या ९ पृ०।

(३) वेहरिआ णाम किआ णाणमई होई मज्झमा वाआ।
इच्छा दक्खन्ती सण्णा सव्वाण समरसा वुत्ती॥—महार्थमञ्जरी ९० श्लो०।
वैखरिका नाम क्रिया ज्ञानमयी भवति मध्यमा वाक्।
इच्छा पुनः पश्यन्ती सूक्ष्मा सर्वासां समरसा वृत्तिः॥ इति संस्कृतम्।

CC.O Sampurnanand University Collection. Digitized by eGangotri

'वाक्तत्त्वं तावत्क्रमात्सूक्ष्मा पश्यन्ती मध्यमा वैखरीति चतुर्धा भिद्यते।

तत्र वैखरीति प्रसिद्धा वाक् ताल्वादिकरणव्यापारोपारूढ-स्फुरणतया क्रियाशक्तिरित्यध्यवसीयते। मध्यमा च बुद्धिवृत्ति-मात्रप्रवर्त्यमानत्वाज् ज्ञानशक्तिः। पश्यन्ती पुनरिच्छा बहिः-प्रसरणाभ्युपगमरूपत्वात्तस्याः। यतः परा वाक् पश्यतीति पश्य-न्त्या व्युत्पत्तिः। सूक्ष्मा तु शिखण्ड्यण्डरसन्यायादुक्तवाक्त्रय-शबलीभावस्वभावा प्रत्यक्दृष्टुः परमेश्वरस्योद्योगलक्षणा वृत्तिरित्या-ख्यायते। परा वाक् पुनस्तस्यैव परमेश्वरस्य स्वरूपमनुप्रविशन्ती परिस्फुरति।' इति

योगिनीहृदये पुनरेतासां पराप्रभृतीनां स्वरूपाणि प्रायेणानयैव दिशा निदर्शितानि।

आत्मनः स्फुरणं पश्येद् यदा सा परमा कला।
अम्बिकारूपमापन्ना परा वाक् समुदीरिता॥
बीजभावस्थितं विश्वं स्फुटीकर्त्तुं यदोन्मुखी।
वामा विश्वस्य वमनादङ्कुराकारतां गता॥
इच्छाशक्तिस्तथा सेयं पश्यन्तीवपुषा स्थिता।
ज्ञानशक्तिस्तथा ज्येष्ठा मध्यमा वागुदीरिता॥

*   *   *   *

क्रियाशक्तिस्तु रौद्रीयं वैखरी विश्वविग्रहा॥
(योगिनीहृदये १।३६—३८,४०)

संक्षेपतस्तावदस्यायमभिप्रायः पर्य्यवस्यति:—

परमशिवरूपस्यात्मनो विमर्शशक्तिरेवावस्थाविशेषमापन्ना परा वागिति व्यपदेशं लभते। सैव यदा परमशिवे सूक्ष्मावस्थयाऽवस्थितं जगदभिव्यञ्जितुमुपक्रमते तदा वामेत्युच्यते। इच्छाशक्तिश्च

CC.O Sampurnanand University Collection. Digitized by eGangotri

पश्यन्ती, ज्ञानशक्तिर्मध्यमा, क्रियाशक्तिः पुनर्वाग्रूपप्रपञ्चप्रथवैखरीरूपा, इति।

योगिनीहृदयदीपिकायाममृतानन्दनाथेन परस्या वाचस्तत्त्वं पूर्वदर्शितस्य "आत्मनः स्फुरणं पश्येदि"त्यादिश्लोकस्य व्याख्याने प्रपञ्चितम्:—

"सा परमा=सर्ववर्णांशभूतविमर्शरूपा, कला=विमर्शशक्तिः, आत्मनः परमशिवस्य, स्फुरणं=पश्यन्त्यादिक्रमेण वैखरीपर्य्यन्तं विमर्शनं, पश्येद्=द्रष्टुमिच्छेत्, तदा परमशान्तात्मिका भूत्वा अम्बिकारूपमापन्ना प्रकाशांशमात्राया अम्बिकायाः सामरस्यमापन्ना परा वाक् समुदीरिता"—इति

शाक्तदार्शनिकमुख्यो लोकोत्तरयोः प्रतिभापाण्डित्ययोर्विश्रामधाम भास्कररायो निजनिर्म्मितायां गुप्तवतीनामिकायां सप्तशतीटीकायामुपक्रमे पश्यन्ती-मध्यमा-वैखरीणां समष्टिरूपा परा वागिति प्रत्यपादयत्। स एव ललितासहस्रनामभाष्ये सौभाग्यभास्कराभिधे

परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता।
मध्यमा वैखरीरूपा भक्तमानसहंसिका॥

इति १३२ तमश्लोकविवरणे परा-पश्यन्ती-मध्यमा-वैखरीणां स्वरूपाणि पुनरित्थं न्यरूपयत्—

सर्वेषां प्राणिनां कर्म्माणि यस्मिन् काले भोगोत्पादाय न कल्पन्ते, तादृशः कालः प्रलयकालः। तत्र प्रयोजनाभावेन जगत्परमेश्वरे विलीनं तिष्ठति। ततस्तेषु कर्म्मसु कालवशेन फलोत्पादोन्मुखतामुपगतेषु प्राणिनां भोगाय सृष्टिः प्रवर्त्तते। तत्र फलप्रदानोन्मुखप्राणिकर्म्माकारपरिणतमायाविशिष्टं ब्रह्माव्यक्तपदवाच्यम्। तदेव कारणविन्दुरित्युच्यते। तस्मात्कारणविन्दोः शब्दब्रह्म संजायते। तदुक्तमागमे—

CC.O Sampurnanand University Collection. Digitized by eGangotri

बिन्दोस्तस्माद् भिद्यमानादव्यक्तात्मा रवोऽभवत् ।
स रवः श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते ॥ (१) इति ।

कारणबिन्दोरत्र सिद्धान्ते व्यापकताङ्गीकारात्कारणबिन्दुना तादात्म्यापन्नं शब्दब्रह्मापि व्यापकमङ्गीक्रियते । तच्च सर्वगं शब्दब्रह्म यदा मूलाधारे (२) वक्तृप्रेरितेन वायुनाभिव्यज्यते तदा परा वागित्याख्यां लभते; तेनैवोर्द्ध्वमाक्रमता वायुना नाभिदेशेऽभिव्यज्यमानमेतदेव शब्दब्रह्म पश्यन्तीति व्यपदेशं भजते । पश्यन्त्याः खल्वागमशास्त्रे उत्तीर्णेति संज्ञान्तरमुपवर्णितम् (३) । तदेव हृदयेऽभिव्यक्तं मध्यमाशब्दप्रतिपाद्यं भवति । कण्ठदेशेऽभिव्यक्तौ तस्यैव शब्दब्रह्मणो वैखरीसंज्ञा (४) । अत एवोक्तमागमविद्भिः—

परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥ इति (५) ।

---

(१) इदं पुराणवाक्यमित्युक्तं वैयाकरणभूषणसारदर्पणे स्फोटप्रस्तावे ६८ तमश्लोकविवृतौ; पाठान्तरं चास्य द्वितीयार्द्धे 'स रव' इत्यत्र 'स एव' इति लघुमञ्जूषादौ ।

(२) देहस्य मध्यमो भागो मूलाधार इतीर्यते ।
गुदात्तु द्व्यङ्गुलादूर्द्ध्वं मेढ्रात्तु द्व्यङ्गुलादधः ॥
त्रिकोणोऽर्धमुखाग्रश्च कन्यकायोनिसन्निभः ।
मानसोल्लासे ४।१२—१३।

(३) "अस्या एवोत्तीर्णेत्यपि संज्ञा । उक्तं च सौभाग्यसुधोदये;—पश्यति सर्वं स्वात्मनि करणानां सरणिमपि यदुत्तीर्णा । तेनेयं पश्यन्तीत्युत्तीर्णेत्यप्युदीर्य्यते माता ॥" सौभाग्यभास्करे १३२ ।

(४) अत्र सौभाग्यभास्करस्थाशय एवोपवर्णितः, ग्रन्थानुपूर्वी तु न दर्शिता विस्तरभयात् ।

(५) अयं श्लोकः परमलघुमञ्जूषायां स्फोटनिरूपण उद्धृतः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

इदं च शाक्तमतं पूर्वदर्शितसकलमतापेक्षया विलक्षणमिति सुधियामतिरोहिततया नात्रोपपादनमपेक्षते ।

नव्यवैयाकरणधुरीणो नागेशमहाशयो लघुमञ्जूषायां स्फोटप्रस्तावे शाक्तसिद्धान्तमिममीषदन्यथाकारं वैयाकरणसिद्धान्तीकृत्य प्रत्यतिष्ठिपत् । सत्यपि वाक्यपदीयग्रन्थे महति पाण्डित्ये नागेशमहाशयस्य भर्तृहरिसिद्धान्तानादरेण शाक्तमतपक्षपातः किंनिबन्धन इति विमृशन्तु विद्वांसः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

DEITIES AND OBJECTS OF OFFERINGS IN THE S'RAUTA SACRIFICES

According to the school of Kātyāyana.

By

Pt. BHAGAVAT PRASAD MISHRA

Professor, Sanskrit College, Benares.

[अथातः कात्यायनश्रौतसूत्रानुसारेण कर्कभाष्यदेवयाज्ञिकपद्धत्याद्यनुसारेण तदनुयायिप्राचीनसम्प्रदायानुसारेण च तत्तत्कर्मणां देवतानामानि तत्तद्देवतानां समष्टिरूपेण व्यष्टिरूपेण वा संज्ञाविशेषान् देवतोद्देशेन दीयमानद्रव्याणि च पुरस्कृत्य सारणीरूपेण तेषां सङ्ग्रहः प्रदर्श्यते । सोऽयमस्मत्प्रेरणया संपादितो देवतानामादिनिदर्शकः संग्रहः वैदिकवाङ्मयनिरतानां विदुषां सन्तोषाय उपकाराय च भविष्यतीत्याशास्महे ।

श्रीमङ्गलदेवशास्त्री]

श्रौतदेवतास्तत्संज्ञा हवींषि च ।

कात्यायनश्रौतसूत्रानुसारेण ।

दर्शपूर्णमासयोः

देवता नामानि	देवताविशेषसंज्ञा[१]कर्मविशेषसंज्ञा वा	द्रव्यम्	विशेषवक्तव्यम्
त्रितः द्वितः एकतः	आप्त्याः	पात्रीनिर्णेजनमङ्गुलिप्रणेजनं च	
भूपतिः भुवनपतिः भूतानांपतिः	परिधयः	स्कन्नहविः	

१. प्रधानत्वेनानिर्दिष्टा देवता 'अङ्गदेवताः' इति संज्ञया व्यवह्रियन्ते याज्ञिकैः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रजापतिः इन्द्रः	आघारौ	आज्यम्	
समित् {तनूनपात् नराशंसो वा} इट् बर्हिः स्वाहाकारः	प्रयाजाः	आज्यम्	
अग्निः सोमः	आज्य- भागौ	आज्यम्	
अग्निः		अष्टाकपालः पुरो- डाशः	अष्टाकपालोपधानचित्रम् 
अग्नीषोमौ	प्र० दे० (पौर्णमासे)	आज्यम्	अत्रोपांशुयागः
अग्नीषोमौ		एकादशकपालः पुरोडाशः	एकादशकपालोपधानचित्रम् 

CC.O Sampurnanand University Collection. Digitized by eGangotri

अग्निः	प्रधान-देवताः (दर्शेऽसन्नयतः)	अष्टाकपालः पुरोडाशः	
विष्णुः		आज्यम्	अत्रोपांशुयागः । अत्र विष्णुः अग्नीषोमौ वा विकल्पेन देवते स्तः
इन्द्राग्नी		द्वादशकपालः पुरोडाशः	द्वादशकपालोपधानचित्रम्



अग्निः अग्नीषोमौ इन्द्रः महेन्द्रो वा	प्रधान-देवताः (दर्शे सन्नयतः)	अष्टाकपालः पुरोडाशः आज्यम् सान्नाय्यम् (दधिपयसी)	दर्शेष्टिर्द्विविधा सान्नाय्यवती असान्नाय्यवती च । तत्र सोमयाजिनो नियमेन सान्नाय्यवती । असोमयाजिनस्तु विकल्पेन । दर्शपूर्णमासेष्टिरियं नित्या काम्या च । तत्र नित्या यावज्जीवं त्रिंशद्वर्षाणि वा भवति । काम्या तु सकृत् । अन्वाहार्योऽस्या दक्षिणा । अध्वर्युर्ब्रह्मा होता आग्नीध्रश्चेति चत्वार ऋत्विजः ।
अग्निः	स्विष्टकृत्	सर्वहविः ।	

CC.O Sampurnanand University Collection. Digitized by eGangotri

देवं बर्हिः देवो नराशंसः देवो अग्निःस्विष्टकृत्	अनुयाजाः	आज्यम्
देवाः	अनुयाजसंभेदः	आज्यम्
विश्वेदेवाः	संस्रवहोमः	हविर्लेपाः
सोमः त्वष्टा देवानांपत्न्यः अग्निर्गृहपतिः	पत्नीसंयाजाः	आज्यम्
अग्निरदब्धायुरशीतमः	अदब्धाहुतिः	आज्यम्
अग्निः संवेशपतिः सरस्वतीयशोभगिनी	संवेशाहुतिः	आज्यम् आज्यम्
अग्निः	पिष्टलेपहोमः	पिष्टलेपः
वातः	समिष्टयजुः	आज्यम्
दिव्यं नभः	बर्हिर्होमः	बर्हिः

CC.O Sampurnanand University Collection. Digitized by eGangotri

जातवेदाः	नैमित्तिकहोमः	यजमानभागः	यजमानभागहोमोऽयं प्रोषिते यजमाने भवति।
जातवेदाः	कर्मापवर्गसमिद्धोमः	आज्यम्	अत्र ब्रह्मकर्तृकम् आहवनीये समिदाधानम्, आहवनीयोपस्थानम्, आहवनीये सकृद्गृहीतहोमः, इतिपक्षत्रयं वर्त्तते। तत्र होमपक्षे अयं यागः। हुतशिष्टं हविः ऋत्विग्भ्य इव यजमानायापि भक्षणार्थं दीयते। सोऽयं भागो यजमानभागः।

—:o:—

पिण्डपितृयज्ञस्य

अग्निः कव्यवाहनः		ईषत्स्विन्नचरुः	
सोमः पितृमान्		"	
यजमानपिता यजमानपितामहः यजमानप्रपितामहः	प्रधानदेवताः	चरुपिण्डाः	अयं हि पिण्डपितृयज्ञो दर्शाङ्गम्। यजमान एव कर्तेति दक्षिणाभावः। स्मार्ताग्निमतोऽप्ययं भवति।

—:o:—

CC.O Sampurnanand University Collection. Digitized by eGangotri

दाक्षायणयज्ञस्य

अग्नीषोमौ (पौर्णमास्याम्)		एकादशकपालः पुरोडाशः	दाक्षायणयज्ञ इति दर्शपौर्णमासयोरेव गौणं नाम न कर्मान्तरम्। प्रकृतेष्टिवत् चत्वार ऋत्विजः। दाक्षायणं =शतरक्तिकापरिमितं सुवर्णमस्य दक्षिणा। संवत्सरं, पञ्चदशवर्षं यावद्वानुष्ठानमस्य भवति।
अग्निः (प्रतिपदि)	पौर्णमासे प्रधानदे०	अष्टाकपालः पुरोडाशः	
इन्द्रः (महेन्द्रो वा)		दधि	अत्र देवयाज्ञिकमते आग्नेयः पुरोडाशः, ऐन्द्रं दधि, ऐन्द्रं पय इति हविस्त्रयम्।
इन्द्राग्नी (अमावास्यायाम्)		द्वादशकपालः पुरोडाशः	पञ्चदशवर्षाण्येव यावज्जीवं वास्यानुष्ठानम्।
अग्निः (प्रतिपदि)	अमावास्यायां प्रधानदे०	अष्टाकपालः पुरोडाशः	
मित्रावरुणौ वाजिनः		पयस्या वाजिनम्	तप्ते पयसि दध्नः प्रक्षेपे कठिनभागः पयस्या उदकभागो वाजिनम्।
दिशः प्रदिशः आदिशः विदिशः उद्दिशः दिशः	दिग्भ्याघारणम्	वाजिनशेषः	

—:o:—

CC.O Sampurnanand University Collection. Digitized by eGangotri

अन्वारम्भणीयेष्टिः

अग्नाविष्णू	प्रधानदे०	एकादशकपालः पुरोडाशः	इयं हि दर्शपौर्णमासयोः (अन्येषां कतिपयानां यागानां च) आरम्भे भवति ।
सरस्वती		चरुः	पष्ठौही=पृष्ठेन वृषभं वोढं समर्था या गौः सा, मिथुनौ वा गावौ अस्या दक्षिणा ।
सरस्वान्		द्वादशकपालः पुरोडाशः	अन्यत्सर्वं प्रकृतिवत् ।

—:o:—

वैमृधेष्टिः

इन्द्रो विमृत्	प्रधा०	एकादशकपालः पुरोडाशः	इयं हि वैमृधेष्टिः पौर्णमासेष्ट्यनन्तरं व्यवस्थितविकल्पेन भवति । यदि आदौ आरभ्यते तदा यावज्जीवं प्रकृतिवत् भवति । नो चेत्कदापि न भवति ।

—:o:—

आदित्येष्टिः

अदितिः	प्रधा०	चरुः	इयमपि दर्शेष्ट्यनन्तरमादिविकल्पेन भवति प्रकृतिवत् ।

—:o:—

आग्रयणेष्टिः (नवान्नेष्टिः)

इन्द्राग्नी	प्रधा०	द्वादशकपालः पुरोडाशः	
विश्वेदेवाः		चरुः	अयं हि चरुः यवकाले नवानां पुराणानां वा यवानां, व्रीहिकाले नवानां पुराणानां वा व्रीहीणां पयसि उदके वा श्रप्यते ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

द्यावा-पृथिवी	प्रधा०	एककपालः पुरोडाशः, आज्यं वा ।	एककपालोपधानचित्रम् ।



इयमिष्टिर्नित्या । यजमानस्य गोष्ठे जातानां यः प्रथमजो गौः (वत्सः) सोऽस्या इष्टेर्दक्षिणा ।

एता आग्रयणाद्या विकृतयो दर्शपूर्णमासेष्ट्यनन्तरमेव भवन्ति, न ततः पूर्वम् ।

तत्र कृताधानस्य सूतकशुक्रास्तादिवशेनानिष्टदर्शपूर्णमासस्य यजमानस्य आग्रयणकाले आगते कालातिक्रमे जायमाने आग्रयणकालएव दक्षिणाग्नौ नवान्नेन चातुष्प्राश्यं पक्त्वा ब्राह्मणान् भोजयेत् यथाशक्ति दक्षिणां च दद्यात् । अनेनैव आग्रयणसिद्धिः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

दर्शपूर्णमासोत्सर्गानन्तरं केवलाग्निहोत्रहोमिनो यजमानस्य नवान्नेन सायं प्रातरग्निहोत्रहोमो भवति। अथवा पूर्वदिनेऽग्निहोत्रीं गां नवान्नं खादयित्वा तस्या गोः पयसा सायंप्रातरग्निहोत्रहोमो भवति। तेनैवास्य आग्रयणसिद्धिः।

गवामयनादिमध्ये आग्रयणकाले आयाते नवान्नाशिताया गोः पयसा दीक्षितव्रतेनैवाग्रयणसिद्धिः।

संवत्सरोपसत्कादौ यज्ञे उपसत्स्वाग्रयणकाले आगते नवान्नेन रौहिणपुरोडाशा भवन्ति। तेनैव आग्रयणसिद्धिः।

संवत्सरसुत्याके यागे आग्रयणकालप्राप्तौ नवान्नेन सवनीयाः पुरोडाशा भवन्ति। तेनैवाग्रयणसिद्धिः।

—:o:—

CC.O Sampurnanand University Collection. Digitized by eGangotri

श्यामाकेष्टेः

(श्यामाकाग्रयणस्य)

अथवा

(आरण्याग्रयणस्य)

सोमः	प्रधान०	श्यामाकानां चरुः	अत्र सर्वं प्रकृतिवद्भवति। दक्षिणायां तु "(१) पुनः संस्कृतः=यो रथो भग्नः सन् सज्जीकृतः, (२) क्षौमं वासः, (३) मधुपर्को (दधिमधुघृतानि) वा, (४) यजमानेन वर्षासु परिहितं यद्वासस्तद्वा दक्षिणा" एते विकल्पाः । इयमिष्टिः वर्षासु शरदि वा सुमुहूर्ते भवति ।

—:o:—

वैणवेष्टेः

सोमः	प्रधान०	वेणुयवानां चरुः	अत्र सर्वं श्यामाकाग्रयणवत् । इदमिष्टिद्वयं वानप्रस्थस्याहिताग्नेर्भवति ।

(to be continued)

CC.O Sampurnanand University Collection. Digitized by eGangotri

A COMPARISON OF THE ṚGVEDA-PRATIŚĀ-KHYA WITH THE PĀṆINĪAN GRAMMAR

By

Dr. M. D. Shastri

The question of the relation of the Pāṇinian grammar with the different Prātiśākhyas has not yet been finally settled. The method so far followed for determining this question has been mostly confined to the examination of only superficial points of similarity or dissimilarity between the same. No thorough and detailed examination of the methods of treatment of the common problems of these works has yet been attempted. This comparison, which is a preliminary to that sort of examination, is especially important for showing the relation of Ṛk-Prātiśākhya with the Pāṇinian grammar as well as for tracing the development of the Pāṇinian grammar itself. I intend to explain the implications of this comparison later on.

Abbrevations :

ऋ० प्रा० = ऋग्वेदप्रातिशाख्यम् ; पा० = पाणिनीयाष्टाध्यायी ; वा० = वार्त्तिकपाठः On पा०; प० = परिभाषापाठः; म० = महाभाष्यम् ; सि० = सिद्धान्तकौमुदी ; पद० = पदमञ्जरी.

Ṛgveda-Prātiśākhya	Pāṇinian Grammar.
ऋ०प्रा०१।१ (समानाक्षराणि)	अक् प्रत्याहारः
,, १।२ (सन्ध्यक्षराणि)	एच् ,,

CC.O Sampurnanand University Collection. Digitized by eGangotri

ऋ०प्रा०१।३ (स्वराः)	अच् प्रत्याहारः
,, १।४	अप्लुतवदुपस्थिते । ई३ चाक्रवर्मणस्य । (पा० ६।१।१२९-१३०)
,, १।६ (व्यञ्जनानि)	हल् प्रत्याहारः
,, १।७ (स्पर्शाः)	झय् ,,
,, १।८	Cp. अणुदित्सवर्णस्य चाप्रत्ययः (पा० १।१।६९)
,, १।९ (अन्तःस्थाः)	यण् प्रत्याहारः
,, १।१० (ऊष्माणः)	शल् ,, Cp. also शर्षु जश्भावषत्वे (वा० on हयवरट्)
,, १।१५=१६	झलां जशोऽन्ते (पा० ८।२।३९) । वावसाने (पा० ८।४।५६)
,, १।१७-१८	ऊकालोऽज् ह्रस्वदीर्घप्लुतः (पा० १।२।२७)
,, १।२०-२१	संयोगे गुरु । दीर्घं च । (पा० १।४।११-१२)
,, १।२७, २९-३०	ऊकालोऽज् ह्रस्वदीर्घप्लुतः (पा० १।२।२७)
,, १।३१	Cp.विचार्यमाणानाम् । उपरि स्विदासीदिति च । (पा० ८।२।९७,१०२)
,, १।३७	हलोऽनन्तराः संयोगः(पा०१।१।७)
,, १।५३	Cp. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते । (प० ६२-६३)

CC.O Sampurnanand University Collection. Digitized by eGangotri

ऋ० प्रा० १।५४	Cp. बाधकान्येव। निपातनानि (प० ११८)
,, १।५५	अणुदित् सवर्णस्य चाप्रत्ययः (पा० १।१।६९)
,, १।५६	स्थानेऽन्तरतमः (पा० १।१।५०)
,, १।६०	Cp. संहितायाम् (पा० ६।३।११४)
,, १।६१	Cp. प्रत्ययलोपे प्रत्ययलक्षणम् (पा० १।१।६२)। सुप्तिङन्तं पदम् (पा० १।४।१४)
,, १।६३-६४	अणोऽप्रगृह्यस्यानुनासिकः (पा० ८।४।५७)
,, १।६५-६६	Cp. इणकोः (पा० ८।३।५७)
,, १।६८	संबुद्धौ शाकल्यस्येतावनार्षे (पा० १।१।१६)
,, १।६९	निपात एकाजनाङ् (पा० १।१।१४)
,, १।७०	Cp. ओत (पा० १।१।१५)
,, १।७१	ईदूदेद्द्विवचनं प्रगृह्यम् (पा० १।१।११)
,, १।७२	ईदूतौ च सप्तम्यर्थे (पा० १।१।१९)
१ १।७३-७४	शे। अदसो मात्। (पा० १।१।१३,१२)
,, १।७५	उञः। ऊँ। (पा० १।१।१७-१८)

———

,, २।२	परः संनिकर्षः संहिता (पा० १।४।१०९)
,, २।५	Cp. पूर्वत्रासिद्धम् (पा० ८।२।१)
,, २।६	Cp. आद्यन्तवदेकस्मिन् (पा० १।१।२१)

19

CC.O Sampurnanand University Collection. Digitized by eGangotri

ऋ० प्रा० २।८,११.१२	एतत्तदोः सुलोपोऽकोरनञ्समासे हलि । स्यश्छन्दसि बहुलम् । (पा० ६।१।१३२–१३३)
" २।१०	झलां जशोऽन्ते (पा० ८।२।३९)
" २।१५	एङः पूर्वपरयोः । अकः सवर्णे दीर्घः । (पा० ६।१।८४, १०१)
" २।१६-१७	आद्गुणः (पा० ६।१।८७)
" २।१८-१९	वृद्धिरेचि (पा० ६।१।८८)
" २।२१	इको यणचि (पा० ६।१।७७)
" २।२४,२७	ससजुषो रुः (पा० ८।२।६६), भोभगोअघोअपूर्वस्य योऽशि । लोपः शाकल्यस्य । (पा० ८।३।१७, १९)
" २।२५,२८,३१	एचोऽयवायावः (पा० ६।१।७८) । लोपः शाकल्यस्य (पा० ८।३।१९)
" २।३२	Cp. ऋत्यकः (पा० ६।१।१२८)
" २।३३	Cp. प्रकृत्यान्तःपादमव्यपरे (पा० ६।१।११५) । { ससजुषो रुः (पा० ८।२।६६) । अतो रोरप्लुतादप्लुते (पा० ६।१।११३) आद्गुणः (पा० ६।१।८७)
" २।३४	एङः पदान्तादति (पा० ६।१।१०९)
" २।३५	Cp. अव्यपरे in प्रकृत्यान्तःपादमव्यपरे । and अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च । (पा० ६।१।११५-११६)

CC.O Sampurnanand University Collection. Digitized by eGangotri

ऋ० प्रा० २।४०	On अवन्तु cp. अन्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च (पा० ६।१।११६)। Cp. also सि० on this sūtra.
" २।५१-५२	प्लुतप्रगृह्या अचि नित्यम् (पा० ६।१।१२५)
" २।५३	Cp. संबुद्धौ शाकल्यस्येतावनार्षे (पा० १।१।१६) and प्लुतप्रगृह्या अचि नित्यम् (पा० ६।१।१२५)
" २।५६	Cp. निपात एकाजनाङ् (पा० १।१।१४)। प्लुतप्रगृह्या अचि नित्यम् (पा० ६।१।१२५)। मय उञो वो वा (पा० ८।३।३३)
" २।५७-५६,७४	ईषाअक्षादिषु च्छन्दसि प्रकृतिभावमात्रम् (वा० ६।१।१२७)
" २।६१,६७	आङोऽनुनासिकश्छन्दसि (पा० ६।१।१२६)
" २।६८-६९	सोऽचि लोपे चेत्पादपूरणम् (पा० ६।१।१३४)
" २।७०-७३	Cp. ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्। द्व्यचोऽतस्तिङः। निपातस्य च। अन्येषामपि दृश्यते। (पा० ६।३।१३३,१३५-१३७); शकन्ध्वादिषु पररूपं वाच्यम्। एवे चानियोगे। एमन्नादिषु च्छन्दसि

CC.O Sampurnanand University Collection. Digitized by eGangotri

	पररूपं वक्तव्यम्। (वा० ६।१।६४); cp. also प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या (वा० ६।१।८६)
ऋ० प्रा० २।७५-७७	Cp. छन्दस्यपि दृश्यते (पा० ६।४।७३)
——	
„ ३।१-२	उच्चैरुदात्तः । नीचैरनुदात्तः । समाहारः स्वरितः । (पा० १।२।२९-३१)
„ ३।३	Cp. समाहारः स्वरितः (पा० १।२।३१)
„ ३।४-६	तस्यादित उदात्तमर्धह्रस्वम् (पा० १।२।३२); cp. also सि० on this Sūtra.
„ ३।७	उदात्तादनुदात्तस्य स्वरितः (पा० ८।४।६६)
„ ३।९-१०	स्वरितात्संहितायामनुदात्तानाम् । उदात्तस्वरितपरस्य सन्नतरः । (पा० १।२।३९-४०)
„ ३।११,१६	एकादेश उदात्तेनोदात्तः (पा० ८।२।५)
„ ३।१२	Cp. पद० (on पा० ८।२।६) :— कन्यानूप इति कन्याशब्दः कन्याराजन्यमनुष्याणामन्त इत्यन्तस्वरितः । ततः स्वरितानुदात्तयोरेकादेश आन्तर्यतः स्वरितः ।
„ ३।१३-१४	उदात्तस्वरितयोर्यणः स्वरितोऽनु-

CC.O Sampurnanand University Collection. Digitized by eGangotri

	दात्तस्य । स्वरितो वानुदात्ते पदादौ । (पा० ८।२।४,६); cp. also सि० on the latter Sūtra.
ऋ० प्रा० ३।१७	उदात्तादनुदात्तस्य स्वरितः । नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् । (पा० ८।४।६६-६७), स्वरविधौ व्यञ्जनमविद्यमानवत् (प० ७६)
,, ३।१९-२३	स्वरितात्संहितायामनुदात्तानाम् । उदात्तस्वरितपरस्य सन्नतरः ।
——	(पा० १।२।३९-४०)
,, ४।२	Cp. झलां जश् झशि (पा० ८।४।५३)
,, ४।३	यरोऽनुनासिकेऽनुनासिको वा (पा० ८।४।४५)
,, ४।४,१२-१३	शश्छोऽटि (पा० ८।४।६३) । छत्वममीति वक्तव्यम् (वा० ८।४।६३)
,, ४।५	झयो होऽन्यतरस्याम् (पा० ८।४।६२)
,, ४।६-७	मोऽनुस्वारः (पा० ८।३।२३) । वा पदान्तस्य (पा० ८।४।५९)
,, ४।८,१०	तोर्लि (पा० ८।४।६०)
,, ४।९-११	स्तोः श्चुना श्चुः (पा० ८।४।४०)
,, ४।१५	मोऽनुस्वारः (पा० ८।३।२३)
,, ४।१६	ङ्णोः कुक्टुक् शरि (पा० ८।३।२८)

CC.O Sampurnanand University Collection. Digitized by eGangotri

सू० प्रा० ४।१७	ङः सि धुट्। नश्च। (पा० ८।३।२९-३०), खरि च (पा० ८।४।५५)
,, ४।१८	शि तुक् (पा० ८।३।३१)। स्तोः श्चुना श्चुः (पा० ८।४।४०)
,, ४।२२	Cp. सि० (on वा० ८।४।४५):— कथं तर्हि मदोदग्राः ककुद्मन्त इति। यवादिगणे (cp पा० ८।२।९) दकारनिपातनात्।
,, ४।२३	मो राजि समः क्वौ (पा० ८।३।२५)
,, ४।२४	ससजुषो रुः (पा० ८।२।६६), भोभगोअघोअपूर्वस्य योऽशि। हलि सर्वेषाम्। (पा० ८।३।१७,२२)
,, ४।२५	ससजुषो रुः (पा० ८।२।६६), हशि च। आद् गुणः (पा० ६।१।११४,८७)
,, ४।२७	For cases like अग्निरस्मि cp. ससजुषो रुः (पा० ८।२।६६). In cases like प्रातरिन्द्रम्, Pāṇini takes प्रातः as प्रातर्; cp. खरवसानयोर्विसर्जनीयः (पा० ८।३।१५)
,, ४।२८-२९	रो रि (पा० ८।३।१४) ढ्रलोपे पूर्वस्य दीर्घोऽणः (पा० ६।३।१११)
,, ४।३१	विसर्जनीयस्य सः (पा० ८।३।३४),

CC.O Sampurnanand University Collection. Digitized by eGangotri

	स्तोः श्चुना श्चुः । ष्टुना ष्टुः । (पा० ८।४।४०-४१)
ऋ० प्रा० ४।३२,३४	वा शरि (पा० ८।३।३६). स्तोः श्चुना श्चुः। ष्टुना ष्टुः । (पा० ८।४।४०–४१)
„ ४।३३-३८	कुप्वोः ≍ क ≍ पौ च (पा० ८।३।३७)
„ ४।३६	खर्परे शरि वा लोपो वक्तव्यः (वा० ८।३।३६)
„ ४।३६	अहरादीनां पत्यादिषूपसंख्यानं कर्तव्यम् (वा० ८।२।७०)
„ ४।४०	On अहोभिः cp. अहन् (पा० ८।२।६८) ; on अहोरात्रम् cp. अह्नो रुविधौ रूपरात्रिरथन्तरेषूपसंख्यानं कर्तव्यम् (वा० ८।२।६८), हशि च । अद् गुणः (पा० ६।१।११४,८७) ; and on प्रचेता राजन् cp. छन्दसि भाषायां च विभाषा प्रचेतसो राजन्युपसंख्यानं कर्तव्यम् (वा० ८।२।७०), रोऽरि (पा० ८।३।१४)। ढ्रलोपे पूर्वस्य दीर्घोऽणः (पा० ६।३।१११)
„ ४।४१	Cp. सोऽपदादौ । इणः षः । (पा० ८।३।३८—३९); cp. also नित्यं समासेऽनुत्तर-

CC.O Sampurnanand University Collection. Digitized by eGangotri

	पदस्थस्य । अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य । अधःशिरसी पदे । कस्कादिषु च (पा० ८।३।४५-४८)
ऋ० प्रा० ४।३२,४५,४६,४९, ५५,५९,६१	Cp. षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु[1] (पा० ८।३।५३)
„ ४।४३,४५,६२	कःकरत्करतिकृधिकृतेष्वनदितेः (पा० ८।३।५०)
„ ४।४४	Cp. छन्दसि वाप्राम्रेडितयोः (पा० ८।३।४९) । पञ्चम्याः परावध्यर्थे (पा० ८।३।५१)
„ ४।४५,५६,६४	Cp. पञ्चम्याः परावध्यर्थे[1] (पा० ८।३।५१)
„ ४।४७,४८	इदुदुपधस्य चाप्रत्ययस्य। इसुसोः सामर्थ्ये । (पा० ८।३।४१,४४)
„ ४।४९,५९	इडाया वा। छन्दसि वाप्राम्रेडितयोः[1] (पा० ८।३।५४,४९)
„ ४।५०,५१	Cp. छन्दसि वाप्राम्रेडितयोः (पा० ८।३।४९) ।

1. The commentators (cp. सि० and काशिका) generally explain these and other Sūtras (i. e., पा० ८।३।४१—६३), in this section, as prescribing only *s*. But a reference to Sūtras like IV. 46,49 (cp. वास्तोष्पतिम् and मातुष्पदे) of the Ṛ. Prāt. as well as to the exception अनदितेः (in पा० ८।३।५०) shows that they should be explained as prescribing both *s* and *ṣ*; cp. Laghu-śabdendu-śekhara (on पा० ८।३।५०):—सः स्यादिति । षत्वस्याप्युपलक्षणम् । अत एवादितिप्रतिषेधः ।.

CC.O Sampurnanand University Collection. Digitized by eGangotri

	इसुसुसोः सामर्थ्ये (पा० ८।३।४४)
ऋ० प्रा० ४।५२-५५,५७,५८, ६१-६४	Cp. छन्दसि वाप्राम्रेडितयोः (पा० ८।३।४९)
,, ४।५९,६१,६२	पातौ च बहुलम् (पा० ८।३।५२)
,, ४।६०	छन्दसि वाप्राम्रेडितयोः । इदुदुपधस्य चाप्रत्ययस्य । (पा० ८।३।४९,४१)
,, ४।६३	On त्रिष्पूत्वी cp. द्विस्त्रिश्चतुरिति कृत्वोऽर्थे (पा० ८।३।४३)
,, ४।६५,६८,७३	दीर्घादटि समानपादे (पा० ८।३।९), भोभगोअघोअपूर्वस्य योऽशि । लोपः शाकल्यस्य । (पा० ८।३।१७,१९)
,, ४।६९-७०,७३	दीर्घादटि समानपादे (पा० ८।३।९)
